प्रयुक्ताख्यात-मञ्जरी

श्रीश्रीरूपगोस्वामिप्रभुपाद-प्रणीता

श्रीधाम-नवद्वीप-श्रीहरिबोल-कुटीरतः

श्रीहरिदासदासेन प्रकाशिता

प्रथमं संस्करणम्

श्रीश्रीरथद्वितीया—४६८ श्रीगौराब्दः

प्रकाशक—
श्रीहरिदास-दास
श्रीहरिबोल कुटीर
(श्रीनवद्वीप)

मुद्राकर—
देबप्रसाद मित्र,
एलेम प्रेस,
६३, विडन ष्ट्रीट, कलि:—६।

श्रीश्रीगौरगदाधरौ विजयेताम्

विज्ञप्ति

श्रीश्रीरूपगोस्वामिप्रभुपादैः खलु जीवनिकाय-हिताभिलाष-परवशतया भट्टमल्लविरचिताख्यातचन्द्रिकामनु प्रयुक्ताख्यात-मञ्जरीति संक्षिप्तः क्रियाकोशोऽयं प्रणिन्ये। लघुतोषणी-नामिकायाः श्रीमद्भागवत-टीकाया उपसंहारे श्रीपादरूप-गोस्वामिनां ग्रन्थगणनावसरे नास्य समुल्लेखः, भक्तिरत्नाकरे किल प्रथमतो नाम प्रयुक्ताख्यातचन्द्रिकेति भ्रमात्मकमेवेति प्रेक्षावद्भिर्विभाव्यम्। वाराणसीतः मुद्रिताख्यातचन्द्रिकाया भूमिकायां क्रियाकोशानां गणनायामस्योल्लेखोऽपि[1] रचयितृनाम-निदशे सम्पादकस्य विचिकित्सा समभूत्। कलिकातानगरीतः छात्रपुस्तकालयाद् गौड़ाक्षरैर्मुद्रितसंस्करणेऽपि सन्देहास्पदत्व-मासीत् यतः प्रतिवर्गमनु 'इति प्रयुक्ताख्यात-मञ्जर्य्यामिति' लेख-समुल्लासेऽपि तिपत्रशिरसि (Heading) प्रयुक्ताख्यात-चन्द्रिकेति नामादृश्यत। परन्तु ग्रन्थान्वेषणावसरेऽस्माभिः श्रीवृन्दावने श्रीदामोदर-ग्रन्थागारे, श्रीविनोदवागमन्दिरे, जय-पुरीय-श्रीगोविन्द-ग्रन्थालये, विकानीर-राजग्रन्थागारे, वराह-

---


१। आख्यातचन्द्रिका (भट्टमल्लस्य), क्रियाकलापः (विद्या-नन्दस्य), क्रियापर्यायदीपिका (वीरपाण्डस्य), क्रियाकोशः (रामचन्द्रस्य), प्रयुक्ताख्यातमञ्जरी (कविसारङ्गस्य ?), क्रियारत्नसमुच्चयः (गुणरत्नसूरेः), धातुरूपभेदः (दशबलस्य वरदराजस्य), कविरहस्यः (हलायुधस्य)।

नगरीय-श्रीगौराङ्ग-ग्रन्थमन्दिरे एवं वहुत्र च प्रयुक्ताख्यात-मञ्जरीति हस्तलिपिरसकृद्दृष्टा। प्रयुक्ताख्यातचन्द्रिकेति श्रीरूपगोस्वामिपाद-कृत-ग्रन्थनाम-विमर्षे तथाख्यातचन्द्रिका-भूमिकायां कविसारङ्ग-कर्तृकतायाश्च सन्देहे जाते सङ्कलनेऽस्या हतादरोऽभवम्। जयपुरीय-ग्रन्थालये खलु श्रीमत्श्रीरूप-हस्ताक्षरैः स्थलविशेषे चूर्णिकासमायुक्तां पुस्तिकां दृष्ट्वा एषैव श्रीरूपपादकृतेति मे सम्मतं मतम्। उपसंहारस्थितस्य कविसारङ्गरङ्गदेति पदस्य सारङ्गति नाम कवेर्नेति निर्णयोऽपि सञ्जातः, गौड़ीयवैष्णव-साहित्ये सारङ्गरङ्गदेति[१] रसिकरङ्ग-देति[२] टीकानामैवासकदृश्यते। अतो ग्रन्थोऽयं श्रीरूपपादकृत इति स्थिरो विश्वासो जातः। गीर्वाणवाणी-प्रणयिनां प्रीतयेऽ-धुनास्य मुद्रणं कृतम् श्रीपादहस्तलेख-प्रतिविम्व-समुल्लसितमिति येनास्य प्रणयितृविषयक-सन्देहलेशोऽपि न स्यादिति।


१। श्रीकृष्णकर्णामृतस्य श्रीकृष्णदासकविराजगोस्वामिनां तथा लघुभागवतामृतस्य श्रीबलदेवविद्याभूषणानां टीका—सारङ्गरङ्गदेति।

२। लघुभागवतामृतस्य श्रीवृन्दावनचन्द्र-तर्कालङ्काराणां तथा पद्यावलीमनु श्रीवीरचन्द्रगोस्वामिनां टीका—रसिकरङ्गदेति।

শ্রীশ্রীরূপগোস্বামিপাদের স্বহস্তাক্ষরে ‘প্রযুক্তাখ্যাতচন্দ্রিকার’ প্রতিবিম্ব



শ্রীশ্রীরূপগোস্বামিপ্রভুপাদের স্বহস্তাক্ষরে 'বিরুদাবলীলক্ষণের' প্রতিবিম্ব



पर्याय-सूचिका

[अङ्क-पर्यायाः श्लोक-पृष्ठयोरिति ज्ञातव्यम्]

अक्षरविन्यासे ९।२४, अग्रवृत्तौ ३६।२७, अङ्कुरोद्भवे ३।१, अङ्गचूर्णने ७३।३१, अङ्गीकारे २३।५, अञ्चति ६।४३, अतिक्रमे ४७।२८, अतिथिभावे ५।२१, अतिशये ५८।२९, अद्भुते ६०।२९, अधिवासे २२।२६, अधिशयने २२।२६, अधोगतौ ४२।२६, अध्ययने ५।११, अध्यासने २२।२६, अध्येति (अदादि) २।४४, अनक्ति (रुधादि) १।४५, अनादरे १२-१४।७, ८ ; अनुकरणे १९।१७, अनुगमने ३०।२६, अनुज्ञायां २०।२२, अनुज्ञाने २५।६, अनुत्कर्षे १४।२, अनुमाने १७।५, अनुवादे ४।१०, अन्तर्धाने ४५।२८, अन्वेषणे २५।३५, अपकारे १९।८, अपक्षये १६।३, अपध्याने १४।५, अपयाने ४६।२८, अपराधे १९।८, अपशब्दे ८।११, अपस्किरते (तुदादि) ३।४५, अपस्मारे २७।१८, अपह्नवे २८।१३, अपानध्वनौ ८।१४, अभिभवे ५८।२९, अभियोगे ५०।२८, अभिषवे ४३।३६, अभिषुणोति (स्वादि) १।४५, अभिसन्धत्ते (अदादि) ४।४५, अभुक्ते २६।२३, अभ्यसूयायाम् ६।७, अभ्यागमे ५।२१, अभ्युत्थाने ५।२१, अर्दने ७९।३१, अर्पणे ३७।१९, अवतंसे १३।१७, अवधाने २२-२३।५, अवष्टभ्नाति (क्र्यादि) २।४६, अशनिशब्दे ३।१४, अश्वध्वनौ ६।१४, असत्कृतौ ९।११, अस्तगमने ४४।२८ ।

आक्रोशे ९।११, आगमने २८।२६, आग्रहे २१।८, आचमने

४।२१, आज्ञायां ८।२४, आदरे ९-१०।२१, आदाने ३२।१९, आनीतौ ३७।३६, आभिमुख्यवचने २६।१३, आमन्त्रणे १८।२२ आमन्त्रयते (चुरादि) ३।४६, आयतौ ५।२४, आरम्भे २।१६ आरोहे २३।२६, आर्त्तध्वनौ ५।१४, आर्द्रभावे ८।३३, आवृतौ २०-२२।३४, आशीर्वादे १७।१२, आस्वादने ३०।६, आह्वाने २४।१२

इज्यारम्भे २४।२३ ।

उक्तौ १-३।१०, उच्चशब्दे ११।१५, उत्कटशब्दे १०।१४, उत्कण्ठाध्वनौ ६।१४, उत्कर्षप्राप्तौ ८८।३२, उत्कलिकायां १९।५, उत्कीर्णे ३।३७, उत्कोचे ६।३९ उत्कोचेन वशीकृतौ ५।२४, उत्क्षेपणे ३६।३६, उत्पाटने ८६।३२, उत्सेके ३५।३६, उदये ३८।२७, उद्देशे १५।५, उद्देशकृतौ १०।२५, उद्भवति १।४२, उद्वर्त्तने ८।१६, उद्यमे ५४।२९, उद्वासे ८।३९, उद्वाहे ३८।१९, उन्मादे २७।९, उन्मूलने ८४।३२, उपभोगे ४३।२०, उपमाने १७।५, उपवर्हणे ४६।२०, उपलेपने ३८।३६, उपसेवने ११।२१, उपालम्भे १३।११, उप्तकृष्टौ २।३२, उप्तौ ५।३३, उल्लेखे ३।३७ ।

ऊर्जयति, ऊर्जयते (चुरादि) ४।४६, ऊर्द्धत्वे ३१।१९ ।

ऋतीयते (चुरादि) ५।४६ ।

ऐश्वर्य्ये १।२४ ।

कटति ८।४३, कटीवन्धे १०।१७, कठोरक्षरणे ४४।२८, कण्डतौ १०।४०, कत्थने १५।१२, कफजशब्दे ८।१४, कम्पे

६५।३०, करुणायां २१-२२।८, करोति (तनादि) १।४५, कर्कशध्वनौ ४।१४, कर्षणे १।३२, कलङ्के १२।११, कलते ११।४३, कवित्वे १६।१२, कषति २०।४४, कार्मुकध्वनौ ९।१४, काशते १४।४३, कुञ्चति ७।४३, कुटिलगमने ३५।२७, कुत्सित-वृत्तौ ३७।२७, कुन्थति ४।४२, कुरुते (तनादि) १।४५, कृणोति (स्वादि) १।४५, कृतौ ३-५।१६, कौक्षध्वनौ ८।१४, कौटिल्ये १९।२५, क्नूयते ९।४३, क्रन्दति ५।४२, क्रमे ३१।१९, क्रमते, क्रम्यते १०।४३, क्रये १६।३४, क्रीड़ायां १८।१७, क्रोशति १५।४३, क्लैव्ये १८।२५, क्षमायां ११-१२।७, क्षिप्रगतौ ३३।२७, क्षियति (तुदादि) २।४५, क्षुते ७।१४, क्षुरति (तुदादि) २।४५, क्षोभे २५।२६।

खगतौ ३२।३७, खगनादे ३।१४।

गणने १७।३४, गमने २५-२७।२६, गर्जति ७।४३, गर्भमोक्षणे ४४।२०, गर्वे २६-२७।९, गीते ९।१४, गुणने १७।३४, गुप्तवादे २०।२६, गुम्फने १७-१८।१२, गृह्णाति गृह्णीते (क्र्यादि) १।४६, गोशब्दे २।१४।

घरति (तुदादि) १।४५, घृष्टौ १३।४०, घोरध्वनौ ५।१४, घ्राणे २९।६।

चरति ११।४३, चर्चायां ११।१७, चलति १५।४३, चलने २३।२६, चायति १८।४४, चुम्बने ४२।२०, चेष्टायां ६।१६।

छटति ८।४३, छद्मगमने ३१।२७, छेदने ४।३७।

जन्मनि २।१, जले २४।२३, जयति १२।४३, जरायां

१२।२, जागर्य्यायां ३३।१०, जीवने ५।२, जुगुप्सायां ३०।९, जुषते (तुदादि) १।४५, जृम्भायां ३१।९, ज्ञपयति २।४६, ज्ञाने २।३ ।

तक्षणे २।३७, तन्द्रायां ३१।९, तरति १९।४४, तर्जने १२।११, तर्पणे १९।२२, तर्षे १८।२१, ताड़ने ६६।३०, तायते १०।४३, तिरश्चां ध्वनौ ५।१४, तुल्ये १५।३४, तृप्तौ २९।१८, तैक्ष्ण्यकरणे ३।३७, तैललेपे ८।१६, तोषणे २३।२३, त्यागे ३३।१९, त्रासने ६३।३०, त्रिःकृषौ ३।३३, त्वङ्गति ६।४३, त्वरायाम् १७।२५ ।

थूत्कारे ३८।१८ ।

दंशने २६।१८, दण्डे ३।२४, दधाति (अदादि) ३।४४, दन्तच्छेदे २४।१८, दम्भे १८।८, दम्भेच्छायां २०।२६, दयते ८।४३, दाने १४।२२, दीक्षते १३।४३, दीप्तौ १५-१६।१७, दीर्घीकरणे ८।३९, दीव्यति (दिवादि) १।४४, दुःखित्वे ३०।९, दुर्गतौ ६।३९, दुष्कृतौ १७।३८, दूरीकरणे ७।३९, दृप्यति (दिवादि) २।४५, दैन्ये २९।९, दोहने २७।३५, द्रवगतौ ४२।१८, द्रवीकृतौ ४२।३६, द्रोहे १८।८, द्वार-प्रवेशने १७।२५, द्विःकृषौ २।३२, द्विधाकृतौ ८६।३२, द्विरुक्तौ ४।१०, द्वेषे ४।७ ।

धमति १८।४४, धान्यच्छेदे ६।३७, धापने २०।२२, धारणे ६।२४, धावति १६।४४, धुक्षते १३।४३, धुनने ६०।२९, ध्याने १७।५, ध्वनौ १।१४ ।

नक्षति १९।४४, नखक्षते ३१।१९, नटने १६।१७, नाथति

नाथते ३।४२, नाशने ८४।३२, निःसरणे २८।२६, निक्षेपे २२।३४, निगीर्णे २५।१८, निन्दायां १०।११, निराकृतौ २९-३०।१३, निरोधने ५६।२९, निर्णये १२।४, निर्यातयति ३।४६, निर्वेदे २४।९, निश्वासे ६।२, निष्कर्षे ११।३८, नीचवृत्तौ ३६।२७, नीराजने १०।२१, नैपुण्ये १६।३४, न्यासार्पणे २३।३५।

पराक्रमे ७२।३१, पराङ्मुखे ४६।२८, परिचर्यायां ११।२१, परिणामे ६।२, परिधाने ९।१६, परिप्लवते ९।४३, परिरम्भणे ३९-४०।२०, परिवृत्तौ ३६।२७, परिश्रमे २९।९, परिहासे ३५।१०, पवते २०।४४, पश्चात्तापे २३।९, पाके ४०।३६, पाठने ५।११, पादोपमर्दने १३।२२, पावित्र्ये २।२०, पिपर्त्ति (अदादि) २।४४, पीड़ने ७९।३१, पुनर्जीवने ५।२, पूजायां ७-९।२१, पूयते ९।४३, पूरण २२।२२, पृणाति (क्र्यादि) १।४६, पेषणे ८३।३२, प्रकृतानुसृतौ ३।१६, प्रक्षेपे १७।२२, प्रगल्भतायां ७३।३१, प्रणामे ६।२१, प्रतिपद्यते (दिवादि) २।४५, प्रतियत्ने ४४।३७, प्रतिष्ठायां १।२४, प्रत्यभिज्ञाने २०।५, प्रत्यावर्त्तने २९।२६, प्रत्येति (अदादि) २।४४, प्रबोधने ३३।१०, प्रभवति २।४२, प्रमाणे १७।५, प्रमादे २१।५, प्रयत्ने ४।७, प्रलापे ३।१०, प्रवासे ४९।२८, प्रश्ने २५।१३, प्रसारे ४१।२८, प्रीतौ ८-९।७, प्रेरणे १०-११।२५, प्रषणे ८।२४, प्रोञ्छे १८।३४, प्लुतखलायां १९।१७, प्लुतगतौ ३१।२७।

फलति ११।४३ ।

बलात्कारे १०।३८, बृद्धौ ७-९।२ ।

भङ्गे ८८।३२, भये १०।७, भवति १।४२, भीमशब्दे ३।१४, भुक्तौ २३-२४।२८, भूषायां १२।१७, भूषाग्रहणे ११।१७, भूषाध्वनौ ९।१४, भेदे २०।२६. भैषज्ये ४६।२०, भोजने २२।२२, भ्रमणे ३३।२७, भ्रमति, भ्रम्यति १७।४४, भ्रेषे १०।११ ।

मण्डयति (चुरादि) २।४६, मदयति १५।४३, मनस्वित्वे ५।४, मरणे १८।३, महीयते (चुरादि) ५।४६, माद्यति (दिवादि) २।४५, माध्यस्थ्यवाचि २८।२३, माने १३।३४, मिश्रणे ३०।३५, मुमुक्षायां २९।२३ मूत्रणे ७।१६, मृगनादे ३।१४, मृदुगतौ ३०।२६, मेघशब्दे १४।२, मेघोद्गमे ४०।२७, मेधति १६।४४, मैथुने ४२।२०. मोचने १४।३८, मोषणे ९।३८, मोहे २१।५, मौण्ड्र २७।२३, म्लाने २८।९ ।

याच्ञायां २४।३५. यात्रायां २६।१३, यौति (अदादि) १।४४ ।

रक्तत्वे ४।३९, रक्षायां २।२४, रथध्वनौ ९।१४, रसपाने २२।१८, राशीकृतौ १०।३३, रिरंसायां २०।४१, रुचौ ४४।३७, रुजि २०।४५, रोचते १४।४३, रापणे ५।३३ ।

लक्षणे १२।३८, लक्षयति १।४६, लङ्घते ५।४२, लोभे ३।७ ।

वञ्चने १५-१७।८, वन्दते ४।४२, वपति १९।४४, वरणे ३५।१९, वर्जने ३४।१९, वर्णयति (चुरादि) ४।४६, वर्द्धयति (चुरादि) २।४६, वल्गूयति (चुरादि) ६।४६, वशीकारे ३।२४,

वहति १८।४४, वाजयति (चुरादि) १।४६, वाञ्छायां १-२।७, वातप्रवाहे ३७।२७, वान्तौ २८।१८, वाहुयुद्धे ७१।३०, विकले ३७।२७, बिकाशे १०।२, विकुरुते १।४५, विक्रये १५।३४, विक्षपे १८।२२, विघ्ने १५।३८, विचारे ८-१०।४, विज्ञप्तौ २७।१३, विड्उत्सर्गे ७।१६, वितर्के ११।४, विदारणे ७।३७, विदीर्णे १३।२, विनक्ति (रुधादि) १।४५, विनयति १६।४४, विनाशे १७।३, विभर्त्ति (अदादि) २।४४, विभवति ३।४२, विभागे १९।३४, विभ्रमे ६।४, विमतौ ६।४, वियोजने २८।३५, विरेके २७।१८, विलम्बे १६।२५, विलापे २४-२५।९, विलोकने २६-२८।६, विवेचने ११।४, विश्रान्तौ ३०।१९, विश्वासे १३।४, विस्तारे १९-२०।१२, विस्मये ३६।१०, विस्मृतौ २०।५, वीजने १४।१७, वीणागाने १०।१४, वीणाध्वनौ ४।१४, वृकध्वनौ ५।१४, वृष्टिरोधे ५।३९, वेधे ६८।३०, वेष्टने ५५।२९, वैतुष्यकरणे ११।३३, वैरे ५-६।७, वैरशुद्धौ ८७।३२, वैराग्ये २९।२३, व्यभिचारे ७।३९, व्याप्तौ ५३।२९, व्युष्टौ ३।३९, व्यूतौ १।३७, व्रतयति ५।४६ ।

शकटध्वनौ ६।१४, शङ्खनादे ७०।३०, शरणागतौ ४।२४, शान्तौ २०।३, शिक्षते १३।४३, शिष्टौ ३।२४, शुक्लत्वे ३।३९, शुचीभावे ३।२१, शुद्धतानिर्णये ८।३८, शुनः ध्वनौ ४।१४, शूलपाके ३६।४२, शेषे ९।४०, २९।१८, शोके २३।९, शौचे १२।२०, श्रद्दधाति ३।४४, श्रवणे २९।६, श्रीणाति (क्र्यादि) १।४६, श्लोकेन स्तुतौ १६।१२ ।

संक्षेपे १८।१२, संघाते १०।४०, संभुङ्क्ते (रुधादि) १।४५, संस्कारे २५।२३, संस्कृतौ ४४।३७, संहृतौ २५।१३, संङ्कल्पे १४।५, सङ्कोचे ११।२, सङ्गतौ ३२।३५, सङ्गाहे ४।३३, सञ्चये ९।३३, सञ्चारे ४१।२८, सत्तायां २।१, सत्योक्तौ ७।११, सन्ततौ १७।३८, सन्दीपने ३९।३६, सन्देशे ९।२४, सन्देहे ७-८।४, सन्नाहे २१।२६, सन्निधौ ५१।२९, सन्न्यासे ६०।२३, समरे ६९।३०, समाप्तौ १९।३, सम्भक्तौ १३।२५, सम्भवति २।४२ ; संमार्जने ३८।३६, सह्ये १३।२५, सादश्ये २०।१८, सान्त्बनायां ३१।१३, सामर्थ्ये ५४।२९, सिंहध्वनौ ६।१४, सिंहनादे ७१।३०, सिद्धौ ३।१, सीदति १६।४४, सुरार्चायां १२।२१, सूचने ३३।११, सूर्य्यचन्द्रग्रहणे ६।३९, सेके ७।३३, सेवायां १२।२५, सौति (अदादि) १।४४, स्कन्दति २०।४४, स्खलने २०।१८, स्तम्भे १४।३८, स्तवे २८।३५, स्तब्धीकृतौ १५।३८, स्तुतौ १४।११, स्थितौ ४।१, स्थिरतायां ६।३३, स्थिरीकरणे ६।२४, स्नाने ३।२१, स्नेहे २५-२६।९, स्पन्दे २३।२६, स्पर्धायां ७।७, स्पर्शे ३०।६, स्फुर्त्तौ १।३, स्मरणे १८।५, स्यूतौ १।३७, स्वापे ३२।९, स्वेदे ६६।३० ।

हरित्त्वे ४।३९, हलिग्रहे ४।३३, हवि-प्रक्षेपे १६।२२, हस्ति-ध्वनौ ६।१४, हावे १७-१८।१७, हासे ३४।१०, हिंसायां ७४-७७।३१, हिक्कायां ७।१४, हिण्डते ७।४३, हिनोति (स्वादि) १।४५, हृणीयते (चुरादि) ४।४६, ह्रस्वे १४।२, ह्रियां १०।७, ह्लादते ४।४२, ह्वयते १८।४४ ।

श्रीश्रीगौड़ीय-गौरव-ग्रन्थगुच्छः—६३

श्रीश्रीगौरगदाधरौ विजयेताम्

प्रयुक्ताख्यात-मञ्जरी

प्रथमः काण्डः

श्रीराधागोविन्ददेवौ जयताम्

[भाव-विकार-वर्गः]

भट्टमल्लैर्विरचिता याऽद्भुताख्यात-चन्द्रिका ।
ततः संगृह्यते प्रायः प्रयुक्तो धातु-सञ्चयः ॥१॥
सत्तायामस्ति भवति विद्यते, चाथ* **जन्मनि** ।
उतपद्यते जायते च सम्भवत्युद्भवत्यपि ॥२॥
अङ्कुराद्युद्भवे प्रायः प्ररोहति विरोहति ।
निष्पद्यते फलति च **सिद्धौ** साध्यति[१] सिध्यति[२] ॥३॥
निर्वर्त्तते च पञ्चाथ **स्थितौ** वसति तिष्ठति ।
वर्त्तते निवसत्यास्ते ध्रियते चावतिष्ठते ॥४॥

---

१ । सिध्यति (ख) ; २ । राध्यति (ख) ।
* त्वन्ताथादि न पूर्वभागित्यमर-परिभाषाऽत्र ।

'क'—वराहनगरीय-श्रीगौराङ्गग्रन्थमन्दिरस्था करलिपिः ।
'ख'—जयपुरीय-श्रीगोविन्दग्रन्थागारस्था करलिपिः ।

जीवति श्वसिति प्राणित्युर्जयत्यपि **जीवने** ।
स्यात् प्रत्युज्जीवति-पदं **पुनर्जीवन**-वाचकम् ॥५॥
प्रश्वसित्यपि **निश्वासे** तथा निश्वसितीत्यपि ।
परिणामे परिणमत्यात्मनेपि च वर्त्तते[१] ॥६॥
[ग] सम्पद्यते कल्पतेऽथ **वृद्धौ** बृंहति बर्धते ।
विपोलत्येधते स्थूलयते पुष्यति चेति षट् ॥७॥
बुद्धि-भेदे समृद्धाख्ये समृद्धयति महीयते ।
आप्यायते स्फायते च क्रमते प्रथतेऽपि च ॥८॥
ऋध्यतृध्नोति च तथा पूर्यते च नव क्रियाः ।
वृद्धौ तु सविकारायां श्वयत्युच्छ्रयतीत्युभे ॥९॥
स्फुटति स्फोटते फुल्लत्युन्मीलत्यपि पुष्प्यति ।
विजृम्भते विकचते **विकाशे** विकसत्यपि ॥१०॥
उच्छ्वसित्यपि तद्भेदे द्वयमुद्घटतेऽपि च ।
सङ्कोचे निमिषत्यत्र मुकुलीभवतीति च ॥११॥
सङ्कुचत्यपि पञ्च स्युर्मीलत्यपि निमीलति ।
अथो **जरायां** जरति जीर्यत्यपि जूणाति च ॥१२॥
विदीर्णत्वे विदलति विशीर्यति च सीदति ।
विदीर्यति स्फोटति च फलतीति च षट् क्रियाः ॥१३॥
ह्रस्वत्वे खर्वति ह्रस्वत्यत्र न्यञ्चत्यवाञ्चति ।
निकृष्यते **लघुत्कर्षे** हीयते चापकृष्यते ॥१४॥

१। विवर्त्तते (ख)। [ग] परिणामभेदे द्वयमित्यपरे ।

कर्मकर्त्तरि पञ्चापक्षीयते चापचीयते ।
कुञ्चत्यल्पीभवत्यत्र घट्टते च विदस्यति ॥१५॥
दीयते क्षयतीत्येतत् पदाष्टकम**पक्षये** ।
अवघट्टत इत्येत**न्निम्नगादेरपक्षये** ॥१६॥
सप्त प्रध्वंसते व्येति विनश्यति विलीयते ।
प्रलीयते **विनाशे** स्युः प्रणश्यति विपद्यते ॥१७॥
परैति प्रैति **मरणे** म्रियते च प्रमीयते ।
सन्तिष्ठते समाप्नोति विरम्यत्यारमत्यपि ॥१८॥
पर्यवस्यत्युपरमत्यात्मनेऽपि क्रियाद्वयम् ।
विविधायां क्रिया-षट्कं **समाप्ता**विदमीक्ष्यते ॥१९॥
निर्वाय**त्यर्चिषः शान्तौ** निर्वात्यप्यत्र शाम्यति ।
इति भाव-विकाराः षट् सभेदाः प्राय ईरिताः ॥२०॥

इति भाव-विकार-वर्गः ।

[बुद्धिवर्गः]

स्फुर्त्तौ सप्ताविरस्त्याविर्भवति प्रादुरस्ति च ।
प्रादुर्भवति निर्भाति स्फुरति प्रतिभासते ॥१॥
ज्ञाने जानाति जानीते वेत्ति वेदावबुध्यते ।
प्रत्येति मनुते चोपलभते प्रतिपद्यते ॥२॥
अवगच्छति चावैति मन्यते चाधिगच्छति ।
विना कर्मात्मनेऽपि स्यात् संवेत्तीति चतुर्दश ॥३॥

गृह्णाति च क्वचिज् **ज्ञाने** नी-वदौ च क्वचिद्यथा।
विद्यासु नयते प्राज्ञो वदते तासु पण्डितः ॥४॥
चित्ते मनस्युरसि च करोति कुरुते पदे।
मनसागोचरीकारे, **मनस्त्वित्वे** मनस्यति ॥५॥
विभ्राम्यति विपर्येति विपर्यस्यति **विभ्रमे**।
भ्रमति भ्राभ्यतीत्येतौ[1] **विमतौ** तु विमन्यते ॥६॥
क्रियात्रयं विवदते तथा विप्रतिपद्यते।
संदिग्धोऽपि च संदेग्धि संशेते विचिकित्सति ॥७॥
क्रिया-चतुष्कं **सन्देहे**, **विचारे** तु क्रिया दश।
मीमांसते चर्चयति विन्ते च विमृशत्यपि ॥८॥
तथा परामृशति च विचारयति चात्मने।
अन्वीक्षतेऽनुसन्धत्ते स्यात् परस्मैपदेऽप्यसौ ॥९॥
इत्यप्युपालोचते द्वौ पर्यालोचत इत्यमू *।
वितर्कयत्युन्नयति तथोत्प्रेक्षत ऊहते ॥१०॥
उत्पश्यति **वितर्के**ऽथ विविनक्ति **विवेचने**।
विवेवेक्त्यात्मनेऽप्येतौ स्याद् विवेचयतीत्यपि ॥११॥
निश्चिनुते निर्णयते निर्णयति च **निर्णये**ऽध्यवस्यति च।
निष्टङ्क्यति च सप्त च, निर्धारयतीह निश्चिनोति स्युः ॥१२॥
विश्रम्भते[2] तु प्रत्येति विश्वसित्याश्वसित्यपि।
श्रद्धत्ते श्रद्दधातीति **विश्वासे** षट् क्रिया मताः ॥१३॥

१। भ्रम्यतीत्येता (ख)। * उपालोचयति, पर्यालोचयति।
२। विस्रम्भते (ख)।

सङ्कल्पयति **सङ्कल्पे**ऽभिसंधत्त इति द्वयम् ।
अपध्यायत्यपध्याने दुःसङ्कल्पयतीति च ॥१४॥

लक्षीकरोत्यद्दिशति स्या**दुद्देशे** क्रिया द्वयी ।
साक्षात्करोत्यात्मनेऽपि **प्रत्यक्षे**ऽध्यक्षयत्यपि ॥१५॥

साक्षयत्यपि चाध्यक्षीकरोत्यनुभवत्यपि ।
मिमीते मायते माति मिनोति मिनुते तथा ॥१६॥

प्रमानुमोपमासु स्युः क्रमात् प्रानूप-पूर्वकाः ।
ध्या**ने** चिन्तयति ध्यायत्यमी भावयति त्रयम् ॥१७॥

स्मरणे त्वभिजानाति स्मरत्यध्येति च त्रयम् ।
उत्कण्ठते तथोत्कण्ठत्युत्कण्ठयति चेत्यपि ॥१८॥

पञ्चै**वोत्कलिकायां** स्युराध्यायत्युन्मनायते ।
प्रत्यभिजानात्यनुसन्धत्ते प्रतिसन्दधात्यपि च ॥१९॥

प्रतिसन्धत्ते प्रत्यवमृशतीमाः **प्रत्यभिज्ञाने** ।
विस्मृतौ विस्मरति च तथैव प्रस्मरत्यपि ॥२०॥

मोहे विचेतीभवति विमुह्यति च मूर्च्छति ।
ऋच्छत्यपि **प्रमादे** तु स्रंसते विमनायते ॥२१॥

प्रमाद्यतीति विमनीभवतीति चतुष्टयम् ।
समादधात्यवदधात्यपि प्रणिदधाति च ॥२२॥

आत्मने **चावधाने** स्युरवधारयतीत्यपि ।
अङ्गीकारे प्रतिशृणोत्यत्र संगिरतेऽपि च ॥२३॥

अकर्मकं संश्रृणुते परस्मै चेत् सकर्मकम् ।
उरर्यूर्युररीभ्यश्च करोति कुरुते पदे * ॥२४॥
अष्टौ स्युः प्रतिजानीतेऽभ्युपैत्यभ्युपगच्छति ।
अनुज्ञानेऽनुमनुतेऽनुजानात्यनुमन्यते ॥२५॥
अत्रैवाभ्यनुजानाति चतस्रोऽथ **विलोकने** ।
निर्वर्णयति निध्यायत्यालोकयति पश्यति ॥२६॥
निरूपयति सपश्यत्यात्मने स्यादकर्मकम् ।
आलोकते लक्षयते निभालयत ईक्षते ॥२७॥
निचायत्यात्मनेऽपि द्वौ निशामयति चेत्यपि ।
लोचते लक्षयति च क्रियाः पञ्चदशोदिताः ॥२८॥
शृणोत्याकर्णयति च तद्वन्निशमयत्यपि ।
निशाम्यतीति **श्रवणे**, **घ्रातौ** जिघ्रति शिङ्क्ते ॥२९॥
स्पृशत्यामृशति **स्पर्शे**च्छुपत्यालभतेऽपि च ।
आस्वादने रसयति लेढ़ि चास्वादयत्यपि ॥
लीढ़े चेति चतुष्कं स्याद् बुद्धिवर्गोऽयमीरितः ॥३०॥

इति बुद्धिवर्गः

[अन्तःकरणवृत्तिवर्गः]

अभिलष्यत्यभिलषत्यात्मनेऽप्यनुरुध्यते ।
आकाङ्क्षति स्पृहयति नाथते वष्टि लिप्सते ॥१॥

---

*उरीकरोति इत्यादि ; उररी, ऊररी, ऊररि, ऊरी, उरी—एते पञ्च शब्दा अङ्गीकारे विस्तारे च वर्तन्ते।

आशंसते कामयते वाञ्छतीच्छत्यभीप्सति ।
समीहते तथाशास्ते **वाञ्छायां** तिथि-संज्ञकाः ॥२॥
लोभे त्रयं लुभ्यतीति धनायति च गृध्यति ।
उद्युङ्क्ते तु प्रयतते क्रमते च व्यवस्यति ॥३॥
उत्सहत्यात्मनेऽपि स्यात् **प्रयत्ने** पद-पञ्चकम् ।
विप्रीयतेऽपरजति द्वेष्टि **द्वेषे**ऽपरज्यति ॥४॥
विरुणद्धि विगृह्णाति पञ्चामी चात्मनेपदे ।
वैरायते तु विद्वष्टि विराध्नोति विरुद्धते ॥५॥
विराध्यति च **वैरे** स्यात्तथा व्युत्तिष्ठतेऽपि च ।
असूयत्यभ्यसूयायामीर्षायामीर्ष्यतीर्ष्यति ॥६॥
संघर्षति स्पर्धते च **स्पर्धायां** प्रतिगर्जति ।
मोदते ह्लादते हृष्यत्यानन्दयति तुष्यति ॥७॥
प्रीणाति प्रीयते **प्रीतौ** निर्वृणोत्यात्मनेऽपि च ।
प्रचेतीभवतीत्यत्र प्रमनीभवतीति च ॥८॥
सुमनायत इत्येव सुमनीभवतीत्यपि ।
सुखायते च निर्वातीत्येताः प्रोक्ताश्चतुर्दश ॥९॥
लज्जते त्रपते मन्दाक्षयत्यपि ह्रणीयते ।
जिह्रेतीति **ह्रियां** पञ्च, विभत्युद्विजते **भये** ॥१०॥
त्रसति त्रस्यति तथा **क्षमायां** तु तितिक्षते ।
सहतीत्यात्मनेऽपि स्यात् त्रयं मृष्यति मर्षति ॥११॥
क्षाम्यति क्षमते चेति सप्त साहयतीत्यपि ।
अनादरेऽवजानाति तथा परिभवत्यपि ॥१२॥

एकादशावगणयत्यवधीरयतीति च ।
असत्तिरोभ्यां कुरुते परस्मैपदभागपि ॥१३॥
तथाऽवमनुते चावमानयत्यवमन्यते ।
विमानयति चात्रावहेलयत्यपि हेडते ।१४॥
वञ्चने विप्रलभते तथा वञ्चयतेऽपि च ।
आत्मने च द्वयं विप्रकरोति निकरोति च ॥१५॥
अत्रोल्लापयते चाभिसन्धत्ते छलयत्यपि ।
प्रतारयति चैवाभिसन्दधाति विचत्यपि ॥१६॥
द्वादश स्युर्गर्धयते[1] प्रलोभयति चेत्यपि ।
प्रस्तोभयति तद्भेदे तथा प्रोत्साहयत्यपि ॥१७॥
दम्भ-क्रियायां दभ्नोति तथैव दम्भयत्यपि ।
जिधांसति द्रुह्यति च **द्रोहे** व्यापादयत्यपि । १८॥
अपाद्राध्यति राध्नोति रध्यतीत्यपराधने ।
अपकारेऽपकुरुते क्षिणोत्यपकरोति च ॥१९॥
पञ्च **क्रोधे** संरभते रुष्यति क्रुध्यतीति च ।
भामते कुप्यतीति स्यादागृह्णात्यात्मनेऽपि च ॥२०॥
अभि-पूर्वं निविशते निर्बध्नात्याग्रहे त्रयम् ।
करुणायान्तु दयतेऽनुगृह्णात्यात्मनेऽपि च ॥२१॥
कृपायते च करुणायते चाप्यनुकम्पते ।
अनुक्रोशत्यपि स्युः षट् तद्भेदे तु प्रसीदति ॥२२॥

१। गर्धयति (ख)।

शोके तु शोचतीत्येकं विषीदत्यनुतप्यते ।
अनुशेतेऽनुतपति **पश्चात्तापे** क्रिया मताः ॥२३॥
निर्विद्यते तु **निर्वेदे** निर्विण्णाभवतीत्यपि ।
क्रियाद्वयं विलपति **विलापे** परिदेवति ॥२४॥
रोदित्यश्रयति क्रन्दत्यपि वाष्पायतेऽपि च ।
अनुरज्यत्यनुरजत्यात्मनेऽपि पदद्वयम् ॥२५॥
प्रीयते स्निह्यति तथा **स्नेहे** पद-चतुष्टयम् ।
गर्वेऽभिमनुते गर्वयते दृप्यति माद्यति ॥२६॥
अहङ्करोत्यात्मनेऽपि क्षीवते चाभिमन्यते ।
गर्वत्युद्धन्त्यथोन्मादे लोड़त्युन्माद्यतीति च ॥२७॥
ताम्यति क्लाम्यति **ग्लानौ** ग्लायति क्लामतीति च ।
मलिनीभवति **म्लानौ** म्लायत्यपि पद-द्वयम् ॥२८॥
खिद्यते ग्लेपते **दैन्ये**, श्राम्यतीति **परिश्रमे** ।
तथैवायस्यतीत्यत्र प्रयस्यति पदत्रयी[1] ॥२९॥
क्लिश्यते व्यथते दुःखायते कृच्छ्रायतेऽपि च ।
दूयते चेति **दुःखित्वे**, **जुगुप्सायां** जुगुप्सते ॥३०॥
वीभत्सतेऽथ **जृम्भायां** जृम्भते जम्भतेऽपि च ।
प्रमीलतीति **तन्द्रायां** घूर्णते प्रचलायते[2] ॥३१॥
शेते निद्राति निद्रायत्यपि निद्रायतेऽपि च ।
तथा संविशति **स्वापे** स्वपित्यपि च षट् क्रियाः ॥३२॥

१। पदद्वयी (ख); २। प्रचलीयते (ख)।

प्रबुध्यते तु जागर्त्ति **जागर्यायां** पदद्वयम् ।
प्रबोधने चेतयते[१] प्रबोधयति चेत्यपि ॥३३॥
हसत्यकर्मकं **हासे** प्रहासे तु सकर्मकम् * ।
स्मयते हसिते स्वल्पे[२] गर्ह्ये कुस्मयते स्मिते ॥३४॥
मध्यमे स्याद्विहसति सुप्रौढ़ेऽपहसत्यदः ।
सनिन्दे तूपहसति **परिहासे** तु भण्डते ॥३५॥
तथा परिहसत्यत्र **विस्मये** तु पदद्वयम् ।
विस्मेरीभवतीत्यत्र तथा विस्मयतेऽपि च ॥३६॥

इत्यन्तःकरण-वर्गः

[वाक्क्रियावर्गः]

आचष्टे वक्ति वदति लपत्याख्याति भाषते ।
अभिधत्ते परस्मै च ब्रूते व्याहरते त्रयम् † ॥१॥
गृणात्युदीरयति च कीर्त्तयत्यालपत्यपि ।
गदत्यपि भणत्यत्र कथयत्यपि शंसति ॥२॥
उक्तौ वावेदयति च क्रिया अष्टादशोदिताः ।
प्रलापे तु प्रलपति कुत्रचिज्जल्पतीति च ॥३॥
आम्रेड़यति तु **द्विस्त्रिरुक्तौ** संजागदीत्यपि ।
अनुवादेऽनुवदनेऽनुवक्तीत्यादयोऽपि च ॥४॥

---

१ । चेतयति (क) २ । मन्दे (ख) । * गोपीं हसति कृष्णः ।
† अभिदधाति, ब्रवीति, व्याहरति ।

पठत्यधीतेऽध्ययने, **शिक्षणे** शिक्षते त्रयम् ।
अभ्यस्यत्यामनति च, **पाठने** पाठयत्यपि ।।५।।
शिक्षयत्यनुशास्तीति चतस्रोऽध्यापयत्यपि ।
वेदमाचष्ट इत्यर्थे वेदापयति सम्मतम् ।।६।।
सत्यापयति **सत्योक्तौ** वथ मिथ्याभिशंसने ।
आक्षारयत्यभिशपत्यभ्याचष्टेऽभिशंति । ७।।
अपशब्दयति म्लेच्छत्यपभ्रंशयतीत्यपि ।
म्लेच्छयत्यपशब्दे स्युरपभाषत इत्यपि ।।८।।
शपते त्रयमाक्रोशे शपत्याक्रोशतीत्यपि ।
मिथ्याकारयते द्वे तदन्यथा द्वेऽसकृत्कृतौ ।।९।
स्खलति भ्रेषते **भ्रेषे** * भ्रषतीति पदत्रयम् ।
जगुप्सते तु **निन्दायां** गर्हते गर्हयत्यपि ।।१०।।
आक्षिपत्यात्मनेऽपि द्वे उपक्रोशति निन्दति ।
तथा भर्त्सयते कुत्सयते गञ्जति च क्वचित् ।।११।।
भयदे तर्जने तर्जत्यत्र तर्जयतेऽपि च ।
पर्यपाभ्यां वदत्येव † **कलंकापैक-निन्दने** ।।१२।।
उपालम्भे प्रतिभिनत्त्युपालभत इत्यपि ।
विक्रोशति तु **विक्रोशे** फुत्करोत्यात्मनेऽपि च ।।१३।।
स्तुतौ पणायतीट्टे च नौति स्तौत्यात्मनेऽपि च ।
अष्टौ स्तवीतीड्यति वन्दते च प्रशंसति ।।१४।।

---

* 'भ्रेषो भ्रंशो यथोचितात्' इत्यमरः । † परिवदति, अपवदति ।

क्वचिच्च श्लाघते चेति स्तुतावेव पदं विदुः ।
कत्थने कत्थते तत्र श्लाघते शाड़तेऽपि च ॥१५॥
कवते वर्णयति च **कवित्वे** कवयत्यपि ।
उपश्लोकयतीत्येषा क्रिया **श्लोकैरुपस्तुतौ** ॥१६॥
स्यात् प्रत्यभिवदत्याशीर्वाद आशिषयत्यपि ।
निबध्नाति ग्रथति च ग्रथ्नाति * ग्रन्थयत्यपि ॥१७॥
गुम्फने सन्दृभति च गुम्फतीति च षट् क्रियाः ।
समाहरति **संक्षेपे** संगृह्णाति समस्यति ॥१८॥
संक्षिपत्यात्मनेऽप्येतास्तद्भेदे यन्त्रयत्यपि ।
तथा कूणयते चाथ **विस्तारे** सप्त कीर्त्तिताः ॥१९॥
विस्तृणोति व्यस्यति च विस्तृणात्यातनोति च ।
चतस्र आत्मनेऽप्येताः प्रपञ्चयति पञ्चमी ॥२०॥
उर्यूरर्यु ररीभ्यश्च करोति कुरुते पदे ।
व्याख्याति व्याकरोत्यत्र व्याचष्टेऽर्थापयत्यपि ॥२१॥
तथा व्याकुरुते चाथ व्यनक्ति ⁂ व्यञ्जयत्यपि ।
करोति प्रादुराविर्भ्यां विवृणोत्यात्मनेप्यमू ॥२२॥
तिष्ठते स्पष्टयति च तथा प्रकटयत्यपि ।
एवं प्रकाशयत्यत्र **विवृतौ** स्फुटयत्यपि ॥२३॥
उद्घाटयत्युद्घटयत्यपि व्यक्तीकरोति च ⁂ ।
आकारयत्याह्वयति स्यादाह्वाने क्रियाद्वयम् ॥२४॥

---

* श्लोकादिरूपेण पदानां ग्रथने, स्रजां ग्रथने च । † वाक्क्रियावर्गे उक्ता अपि व्यनक्तीत्यादयो अन्यत्रापि ज्ञेयाः । ⁂ विवृतिभेदे त्रयम् ।

स्यात् **संहूतौ** संह्वयते **स्पर्धायां** ह्वयते ह्वे * ।
अनुयुङ्क्ते प्रश्नयति **प्रश्ने** ज्ञीप्सति पृच्छति ॥२५॥
आपृच्छते तु **यात्रादौ** † तथानुज्ञापयत्यपि ।
आभिमुख्येन वचनेऽभिब्रवीत्यभिवक्ति च ॥२६॥

प्रतिवक्त्युत्तरयति प्रत्याहेत्यादयोऽपि च ‡ ।
विज्ञापयति **विज्ञप्तौ** निवेदयति च द्वयम् ॥२७॥

अपह्नुतेऽपजानीते निह्नुतेऽपलपत्यमी ।
अपह्नवे निराचष्टे प्रत्याचष्टे निरस्यति ॥२८॥

‖ सप्ताऽपोहति च प्रत्यादिशत्यपि परास्यति ।
अपाकरोत्यात्मनेऽपि व्युदस्यत्यप्यपास्यति ॥२९॥

प्रत्याख्याति क्षपयति स्यात् परानुदतीति च ।
निराकराति च पराकरोति च **निराकृतौ** ॥३०॥

लुञ्चत्यपनयत्येतद्भेदे व्यपनयत्यपि ।
उपमन्त्रयते चोपवदते सान्त्वयत्यपि ॥३१॥

सान्त्वनेऽष्ट सामयति तथोपच्छन्दयत्यपि ।
परस्मै चानुनयतेऽनुलोमयति तद्भिदि ॥३२॥

अनुकूलयतीति द्वे सूचयत्यत्र **सूचने** ।
तथा पिशुनयत्येष वाक् क्रियावर्ग ईरितः ॥३३॥

इति वचनक्रियावर्गः

---

* आहूतौ । † यात्राद्यर्थमनुज्ञा-प्रार्थने । ‡ प्रतिपूर्वा वागर्थाः उत्तरे प्रायः । ‖ निरस्यत्यादयः सप्त आत्मनेऽपि ।

[ध्वनिक्रिया-वर्गः]

रवीति रौति नदति ध्वनति ध्यनयत्यपि ।
शब्दायते स्वनति च **ध्वनावष्टौ** रणत्यपि ॥१॥
रम्भते रेभते **शब्दे गवामुक्ष्णस्तु** नर्दति ।
मेघस्य तु स्तनयति तथा रसति गर्जति ॥२॥
स्फुर्जत्य**शनि-निर्घोषे, भीमे** घुरति गर्जति ।
प्रायो **मृग-खगादीनां नादे** कूजति गुञ्जति ॥३॥
वीणादेः क्वणति प्रायः कवति कौति **कर्कशे** ।
भषते वुक्कयति च वुक्कतीति **शुनो ध्वनौ** ॥४॥
रिणाति रेषते **वार्क, तिरश्चां** वाश्यते ध्वनौ ।
कुरति घुरतीत्यार्त्तौ, **घोरे** ध्वाङ्क्षति **वाशिते** ॥५॥
हेषते ह्रेषते**ऽश्वानां, हस्तिनां** बृंहतीति च ।
बुक्कारयति **सिंहाना,मुत्कण्ठास्वन** आनुते ॥६॥
निष्कूजति तु संक्रीड़त्येते **शकट-घोषणे** ।
हिक्कते हिक्कतीति द्वे **हिक्कायां** क्षौति तु **क्षुते** ॥७॥
काशते **कफजे शब्दे,** सौरते मणतीत्यदः ।
कौक्षे कर्दत्य**पानोत्थे** पर्दते शर्द्धते पदे ॥८॥
चीत्करोति क्रेङ्करोति **रथ-कार्मुकयोः** क्रमात् ।
द्वे आत्मनेऽपि **भूषादेः** शिङ्क्ते **गीते** गायतीति ॥९॥
उपवीणयतीत्येत**दुपगाने** हि वीणया ।
उद्घोषत्युत्**कटे शब्दे** निर्घोषति च ह्रादते ॥१०॥

उत्पूर्वाः शब्द-वाचिन्यः क्रिया **उच्चस्वने** मताः।
प्रतिपूर्वाः **प्रतिध्वाने**, शब्दवर्गोऽयमीरितः ॥११॥

इति ध्वनिक्रिया वर्गः।

अत्र भाव-विकाराणां[1] धियामिच्छादि-कर्मणाम्।
वाचां तत्सङ्गतानाञ्च पर्यायाः प्राय ईरिताः ॥१२॥

इति प्रयुक्ताख्यातमञ्जर्यां प्रथमः काण्डः ॥

१। तथाच नैरुक्ताः—जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति क्रमेण षड्भाव-विकारानाहुः।

द्वितीयः काण्डः

अथोच्यन्ते नृ-विप्रादि-चेष्टा वर्गैः समासतः ।
प्रसङ्गतोऽन्याः पर्यायैः क्रमान्नृादि-पदात्मकैः ॥१॥

[मनुष्यचेष्टा-वर्गः]

आरम्भे तु प्रक्रमते प्रस्तौतीत्यात्मनेऽपि च ।
अथैवारभते चोपक्रमतेऽत्र चतुष्टयम् ॥२॥
प्रकृतानुसृतौ चानुबध्नात्युद्घातयत्यपि ।
कृतौ करोति कुरुते विधत्ते विदधाति च ॥३॥
तनुते वितनोत्यत्र सृजत्युपादयत्यपि ।
निर्मीते भावयति निर्माति रचयत्यपि ॥४॥
निष्पादयते निर्वर्त्तयति साधयतीति च ।
अनुतिष्ठत्याचरति श्रद्धायुक्ते तु सृज्यते * ॥५॥
उत्तिष्ठते तु घटते **चेष्टायां** सप्त चेष्टते ।
व्यायच्छते व्याप्रियते प्रवर्त्तत इहेहते ॥६॥
विड्-उत्सर्गे तु गुवति हदतेऽथावमेहति ।
मूत्रणे मूत्रयति च प्रस्रवत्यपि च त्रयम् ॥७॥
उन्माष्टुं **उद्वर्त्तने** चोत्सादयत्युद्वर्त्तयत्यपि ।
द्वयं **तलादिभिर्लेपे** म्रक्षयत्यभ्यनक्ति च ॥८॥
परिधाने परिदधात्यत्र संवस्त्रयत्यपि ।
आच्छादयति वस्ते च परिधत्ते च पञ्चकम् ॥९॥

---

* मालां सृज्यते वैष्णवः ।

कटीबन्धे घटयति तथा परिकरोत्यपि ।
प्रावृतौ प्रच्छादयति तथात्र प्रावृणोत्यपि ॥१०॥
अनुलिम्पति **चर्चाया**मुपदेग्ध्यात्मनेऽप्युभे ।
चर्चयत्यथ **भूषादि-ग्रहणे** प्रतिमुञ्चति ॥११॥
आमुञ्चत्यात्मनेऽप्येताः पिनह्यत्यपिनह्यति ।
परिष्करोति **भूषाया**मात्मनेऽलङ्करोत्यपि ॥१२॥
मण्डते मण्डयति च भूषयत्यपि भूषति ।
प्रसाधयत्यथोत्तंसत्यवतंसे वतंसति ॥१३॥
अनक्ति कज्जलयति **वीजने** वीजयत्यथ ।
सुरभीकुरुते धूपयति वासयतीत्यपि ॥१४॥
चकास्ति भासते भाति रोचते च प्रकाशते ।
शोभते भ्राजते राजत्यात्मनेऽप्यत्र दीव्यति ॥१५॥
दीप्यते द्योतते **दीप्तौ** ज्वलत्युल्लसतीत्यपि ।
नटने नाटयत्यत्र त्रयं नटति नृत्यति ॥१६॥
हिलतीति तु **हावे**ऽथ कुमारयति खेलति ।
विहरत्यात्मनेऽप्यत्र तथा क्रीड़ति दीव्यति ॥१७॥
खेलायतीह ललति रमते विलसत्यपि ।
आङोऽनुसंपरिभ्यश्च क्रीड़ते **क्रीड़नार्थकाः** * ॥१८॥
कूर्दते **प्लुतिखेलाया**मथा**नुकरणे** त्रयम् ।
विड़म्बयत्यनुकरोत्यात्मनेऽनुहरत्यदः ॥१९॥

---

* आक्रीड़तो, अनुक्रीड़तो, संक्रीडतो, परिक्रीड़तो।

भवेत् प्रतिनिधत्ते तु **सादृश्ये**ऽत्रानुकल्पत ।
रिङ्गति स्खलतीत्येषा **स्खलने** स्यात् क्रीयाद्वयी ॥२०॥
'**तर्षे** तृष्यत्युदन्यति पिपासत्यपि तर्षति'[१] ।
पिवत्याचामति धयत्यत्र **पाने** च पीयते ॥२१॥
कठिनद्रव्य-संबद्ध-**रसपाने** तु चूषति ।
वुभुक्षते क्षुध्यति च जिघत्सत्यशनायति ॥२२॥
जेमत्यश्नाति चरति भक्षयत्यत्ति खादति ।
भुङ्क्ते तृणोति तर्णोति तथाभ्यवहरत्यपि ॥२३॥
आत्मने च त्रयं * प्साति जक्षिति प्रत्यवस्यति ।
उपयुङ्क्ते च **भुक्तौ** स्युर्**दन्तच्छेदे** तु चर्वति ॥२४॥
सध्वनौ विष्वणत्यव तथा चावष्वणत्यपि ।
निगीर्णे तु गिलत्यत्र ग्रसते निगिरत्यपि ॥२५॥
दन्दश्यते दन्दशीति दन्दंशीत्यत्र[२] **गर्हिते** ।
दंशे, **विशुद्धे** दशति तथा दंशयते द्वयम् ॥२६॥
अपस्मरत्य**पस्मारे**, **विरेके** तु विरिच्यते ।
कर्मकर्त्तर्यसौ तत्र भवेदतिसरत्यपि ॥२७॥
वान्तौ वमत्युद्गिरति च्छर्दयत्युद्गिलत्यपि ।
निष्ठीव्यतीति **थूत्कारे** द्वयं निष्ठीवतीत्यपि ॥२८॥
शेषे परिशिनष्टीति द्वितयं शेषयत्यपि ।
तृप्तौ तृप्यति तृप्नोति सुहितीभवतीत्यपि ॥२९॥

१। तर्षे तृष्यत्यमी धित्सत्युदन्यति पिपासति (ख) ।
२। दन्दशत्यत्र (ख) । * तृणोत्यादिकम् ।

विश्राम्यतीति **विश्रान्तौ** क्वचिद् विश्रमते मतम् ।
आस्ते निविशते चोपविशत्यत्र निषीदति ॥३०॥
ऊर्ध्वीभवति चोत्तिष्ठत्यूर्ध्वत्वे तिष्ठतीत्यपि ।
अनुक्रामति पर्यति परीयत इति **क्रमे** ॥३१॥

आदाने स्वीकरोत्यत्र गृह्णात्यप्यात्मने द्वयम् ।
उपादत्ते गृहयते लाति षट् स्युः प्रतीच्छति ॥३२॥
त्यागे त्यजत्युत्सृजति जहात्युज्झति मुञ्चति ।
उत्सृज्यते विसृजति मुञ्चते रहयत्यपि ॥३३॥
आत्मने स्यात् परिहरत्यत्र मोक्षयतीत्यपि ।
वर्जने वारयत्यत्र स्यान्निवारयतीति च ॥३४॥

तथा वृणक्ति* वृङ्क्ते च व्यासेधति निषेधति ।
वर्जयत्यपि सप्तैता, **वरणे** वरयत्यदः ॥३५॥
व्यावृत्यते वृणोतीति वृणातीत्यात्मनेऽप्युभे ।
आधत्ते च निधत्ते च निदधात्यादधाति च ॥३६॥
आरोपयत्यर्पयति न्यस्यतीति तथाऽर्पणे ।
विन्यस्यतीति तद्भेदे सन्निवेशयतीति च ॥३७॥
करोति हस्ते पाणिभ्यां कुरुते चोपयच्छते ।
विवहत्युद्वहति **चोद्वाहे** परिणयत्यपि ॥३८॥
चत्वारि चात्मने ॰ ज्येष्ठेऽनूढ़ेऽत्र परिविन्दति ।
आचोटयत्याचुटति द्वयमेतन्नखक्षते ॥३९॥

---

* वृणक्तिर्वरणेऽपि । ॰ परिविन्दतीत्यन्तानि ।

परिष्वजत आश्लिष्यत्यालिङ्गत्युपगहति ।
क्रोड़ीकरोत्यात्मने द्वावङ्कपालयतीति च ॥४०॥
सप्त स्युः **परिरम्भे**, परिरभतेऽप्यथ **रिरंसायाम्** ।
कामयतेऽत्र वृषस्यति, रिरंसते चेत् परयोषितम् ॥४१॥
अश्वस्यति तु यद्यश्वा **चुम्बने** चुम्बतीत्यदः ।
व्यवैति संविशत्यत्र निधुवत्यपि **मैथुने** ॥४२॥
मिथुनीभवतीत्यत्र संप्रयुङ्क्तो यभप्यपि[1] ।
उपभुङ्क्ते **तूपभोगे** संभुङ्क्तो निर्विशत्यपि ॥४३॥
प्रसूयते प्रसूते च **गर्भ-मोक्षे** विजायते ।
प्रजायते जनयति प्रसौतीति षड़ीरिताः ॥४४॥
गर्भमोक्षादि-संक्लेशे द्वयं कुथ्नाति कुन्थति ।
शूलयत्यामयत्यत्र रुजत्यपि **रुजि** त्रयम् ॥४५॥
उल्लाघयति **भैषज्ये** भिषज्यति चिकित्सति ।
उपवर्हत्युपदधात्यात्मनेऽप्युपवर्हणे ॥४६॥

इति मनुष्य-चेष्टावर्गः

[ब्रह्मचेष्टावर्गः]

शौचे नेनेक्ति नेनिक्ते प्रक्षालयति धावति ।
धावते शोधयति च तद्भेदे मार्ष्टि मार्जति ॥१॥
अत्रोपसंस्करोतीति चतस्रो मार्जयत्यपि ।
पावित्र्ये तु पुनातीति पुनीते पवतेऽपि च ॥२॥

---

१ । जभत्यपि (क) ।

शुध्यतीति **शुचीभावे** विशुध्यत्यवदायति ।
स्नाने तु स्नायति* स्नाति तद्विशेषे तु मज्जति ॥३॥
व्रुड्त्याप्लवते चात्र स्युश्चतस्रोऽवगाहते ।
उपस्पृशति चाचामत्युभे **आचमनार्थके** ॥४।

अभिमुख्यागमेऽभ्येति तथाभ्यायाति च द्वयम् ।
अभ्युत्थान-क्रियायान्तु स्यादभ्युत्तिष्ठतीत्यदः ।
प्राघुणत्य**तिथीभावे** तथाभ्यागच्छतीत्यपि ॥५॥

अभिवादयति **प्रणतावुपसंगृह्णाति** चात्मने द्वितयम् ।
नमति नमस्यति षट् स्युः, प्रणिपतति वन्दते चात्र ॥६॥

अथार्चत्यञ्चति यजत्यपचायति चात्मने ॥७॥
चतस्रः† पूजयत्यत्र महयत्यर्हयत्यपि ।

सभाजयत्यर्चयते महत्याराधयत्यपि ॥८॥
सपर्यति चाराध्नोत्याराध्यति तथार्हति ।

मानयत्यपि **पूजायामादरे** सत्करोति च ॥९॥
सम्मन्यते चाद्रियते तथा संभावयत्यपि ।
नीराजने तु निर्मञ्छत्यत्र नीराजयत्यपि ॥१०॥
शुश्रूषते परिचरत्युपास्ते वरिवस्यति ।

चतस्रः **परिचर्यायां** लालयत्युपसेवने ॥११॥
तथोपसेवते चाथ यजते चोपतिष्ठते ।
यजत्यपि **सुरार्चायामथ** विश्रमयत्यपि ॥१२॥

---

* ष्णै वेष्टने, धातूनामनेकार्थत्वात् । † अर्चत्याद्याः ।

संवाहयति चात्र द्वे **पादाद्यङ्गोपमर्दने** ।
दाने ददाति दत्ते च ददते वितरत्यपि ॥१३॥
प्रयच्छत्यर्पयति च दिशते दिशति क्वचित् ।
अपवर्जयति स्पर्शयते[1] विश्राणयत्यपि ॥१४॥
तथा विलभते राति प्रतिपादयतीत्यपि ।
स्वधाकरोत्यात्मने द्वौ पितृभ्यो निर्वपत्यपि ॥१५॥
जुहोति **हविषामग्नौ प्रक्षेपे** त्रितयं मतम् ।
स्वाहा वौषट् वषड्भ्यश्च करोति कुरुतेऽपि च * ॥१६॥
प्रक्षेपे तु प्रणिवपत्यत्र[2] प्रक्षिप्यतीत्यपि ।
मिनोत्यात्मनेऽपि स्युश्चतस्रः प्रक्षिपत्यपि ॥१७॥
विक्षिपत्यात्मनेऽपि स्याद्**विक्षेपे** विकिरत्यपि ।
आमन्त्रणे केतयति निमन्त्रयत इत्यपि ॥१८॥
अत्रामन्त्रयते चाथ **तर्पणे** धिनुतेऽवति ।
धिनोति प्रीणयति च पञ्च तर्पयतीत्यपि ॥१९॥
अनुज्ञायास्तु करणेऽनुजानात्यनुमन्यते ।
धापयत्यात्मनेऽपि द्वौ **धापने** पाययत्यमू ॥२०॥
चूषयत्यादयोऽप्यत्र स्युरथो **परिवेषणे** ।
द्वयं यामयतीत्यत्र परिवेवेष्टि चात्मने ॥२१॥
आदयत्यात्मनेऽप्यत्र भोजयत्यादि **भोजने** † ।
पिपर्त्ति पूरयति च पारयत्यपि **पूरणे** ॥२२॥

---

१ । स्पर्शयति (ख) ; २ । प्रतिक्षिपत्यत्र (क) ।
* स्वाहाकरोति, वौषट् करोति, वषट् करोतीत्यादि । † आदिशब्दात्

अत्राप्याययति प्राति पृणातीत्यथ **तोषणे** ।
सुखाकरोति सुखयत्याह्लादयति चेत्यपि ॥२३॥
धिनोत्यानन्दयति च मृड़यत्यादयस्तथा § ।
इज्यारम्भे दीक्षते च जपतीति त्रिधा **जपे** ॥२४॥
जञ्जप्यते **जपे निन्द्ये** संजपत्यत्र शोभने ।
उपाकरोत्यात्मनेऽपि **संस्काराद्ये** श्रुतेर्ग्रहे ॥२५॥
अभुक्तौ तूपवसति लङ्घते व्रतयत्यपि ।
तप्यते तु **तपस्यायां** तपस्यत्यप्युभे क्रिये ॥२६॥
करोति कुरुते **मौण्ड्ये** भद्रमद्रापुरःसरे ॐ ।
'मुण्डयत्यत्र वपति तथा मुण्डयतेऽपि च'[1] ॥२७॥
उपेक्षते तथोदास्ते पदे **माध्यस्थ्य-वाचिनी** ।
स्युर्विरज्यत्युपरमत्यात्मने विरजत्यमूः ॥२८॥
उपशाम्यति **वैराग्ये** तथा निर्विद्यतेऽपि च ।
मुमुक्षत **मुमुक्षाया**ममर्तीयति मोक्षते ॥२९॥
प्रत्यञ्चति समाधत्त निर्विकल्पीभवत्यपि ।
परिव्रजति **सन्न्यासे** संन्यस्यत्यात्मनेऽप्यदः ॥३०॥
ब्रह्मीभवति कैवल्ये निर्वातीति चतुष्टयम् ।
कर्मकर्त्तरि तत्र द्वे मुच्यते चापवृज्यते ॥३१॥

इति ब्रह्मचेष्टावर्गः

खादयति, अभ्यवहारयति, आशयतीत्यादयः । § आदिशब्दात् तोषयति, हर्षयति, प्रमोदयतीत्यादयः । ॐ भद्राकरोति मद्राकरोति भद्रङ्करोति इत्यादि ।

१ । पंक्तिरियं ख-पुस्तके नास्ति ।

क्षत्रियचेष्टावर्गः

ऐश्वर्ये इन्दतीष्टे च तप्यतेऽधीष्ट इत्यपि ।
प्रतिष्ठाप्तौ तु विख्याति प्रख्याति प्रतितिष्ठति[1] ॥१॥
रक्षणे त्रायत पाति गोपायति भुनक्ति च ।
पिपर्त्ति रक्षति तथा पालयत्यवतीति च ॥२॥
शास्ति **शिष्टौ** शिक्षयति **दण्डे** दण्डयतीत्यदः ।
दाम्यत्यथ **वशीकारे** धारयत्यात्मनोऽपि च ॥३॥
तथा वशीकरोतीति संगृह्णातीति च पूर्ववत् ।
प्रपद्यते तु **शरणागतौ** शरणयत्यपि ॥४॥
परिक्रीणीत इत्येत**दुत्कोचादि-वशीकृतौ** * ।
आयत्तौ स्यादायतते वशीभवति च द्वयम् ॥५॥
स्थिरीकृतौ स्थापयति तथा द्रढ़यतीत्यपि ।
धारणार्थे धारयति दधाति च विभर्त्ति च ॥६॥
द्वे आत्मने च दधते धरतोति च पञ्चकम् ।
नियुङ्क्त आज्ञापयति निदिशत्यादिशत्यपि ॥७॥
द्वावात्मने **चाज्ञायामथ** प्रस्थापयत्यपि ।
प्रेषणे प्रेषयति च प्रेष्यति प्रहिणोति च ॥८॥
सन्देशे वाचिकयते सन्दिशत्यात्मनेऽपि च ।
लिखत्यक्ष**र-विन्यासे** तथा लिपयति द्वयम् ॥९॥

१। च प्रतिष्ठति (क)।

* आदिशब्दात् समयबन्धपूर्वकक्रयादिना च वशीकृतौ ।

उद्ग्रालयत **उद्देशकृता**वुद्देशयत्यपि ।
प्रेरणे प्रस्यत्यत्र क्षिपतीत्याप्मनेऽपि च ॥१०॥

कालयत्यस्यति तथा नुदतीति च पञ्चकम् ।
सेवतेऽनुसरत्यत्र भजति श्रयतीति च ॥११॥

आप्मनेऽन[1]रुणद्धोति तिस्र एवानुवर्त्तते ।
अनुजीवति **सेवायां** जुषतेऽनुचरत्यपि ॥१२॥

वृणीत इति **संभक्तौ** वनतीत्यात्मनेऽपि च ।
सजूःकरोत्यात्मनेऽपि **सख्ये** सत्राकरोति च ॥१३॥

प्रापणे लम्भयत्यत्र हरत्यपि नयत्यपि ।
वहतीत्यात्मनेऽप्येताः प्रापयत्यापयत्यपि ॥१४॥

ये ण्यन्ता गमनार्थास्ते धातवो नीञ्-समार्थकाः ।
विलम्बते कुण्ठति च व्याक्षिपत्यात्मनेऽपि च ॥१५॥

मन्दायते चिरयति **विलम्बे**ऽथ प्रतीक्षते ।
अनुपालयतीत्यत्र प्रतिपालयतीति च ॥१६॥

प्रतिहारयति **द्वार-प्रवेशन-विधौ** क्रिया ।
संभ्राम्यति **त्वरायां** स्यात्त्वरते संभ्रमत्यपि ॥१७॥

अस्यामाविजते चाथ **वैक्लव्ये** विक्लवत्यपि ।
विह्वलत्यत्र टलति **क्लैव्ये** तु क्लीवते क्रिया ॥१८॥

क्लीवायतेऽथ **कौटिल्ये** वल्कते कुटतीत्यपि ।
भुजति न्युञ्जति तथा कुञ्चत्यपि समार्थकम् ॥१९॥

१। तु (क) ।

गुप्त-बादे मन्त्रयते, **भेदे** तूपजपत्यदः ।
दम्भेच्छायां धीप्सतीति दिदम्भिषति धिप्सति ॥२०॥
संवर्मयति सनह्यत्यत्र संनह्यतेऽपि च ।
सज्जयत्यपि **सन्नाहे** तथा संशयतेऽप्यदः ॥२१॥
अधिशेतेऽधिशयेनऽध्यासने त्वधितिष्ठति ।
अध्यास्तेऽथाधिवसतीत्यधिवासे सकर्मकाः ॥२२॥
षड़मी स्युरथारोहे आरोहत्यधिरोहति ।
स्फुरति स्पन्दते **स्पंदे, चलने** तु चतुष्टयम् ॥२३॥
चलति प्रङ्खति तथा घट्टते वेल्लतीत्यपि ।
उत्सेधति तथोन्नह्यत्युच्छ्रयत्यात्मने द्वयम् ॥२४॥
क्षोभते क्षुभ्यति **क्षोभे, गमने**ऽञ्चति गच्छति ।
प्रतिष्ठते जिहीते च सरति व्रजतीयते ॥२५॥
पद्यते याति चरति सर्पत्ययति चञ्चति ।
ऋच्छति स्रवते गाते चलत्येति च टीकते ॥२६॥
अयते क्रामतायर्त्ति क्रिया द्वाविंशतिर्मताः ।
निर्गच्छति तु निर्याति निष्क्रामति निरेति च ॥२७॥
प्रायो **निःसरणार्थाः** स्युर्निष्पूर्वा गमनार्थकाः ।
तदा **त्वागमनार्थाः** स्युर्यद्याङ्पूर्वा भवन्त्यमी ॥२८॥
स्यात् प्रत्यावर्त्तते प्रत्यायाति व्याघोटतेऽपि च ।
प्रत्याङ्-पुरःसराः **प्रत्यावृत्तौ** स्युर्गमनार्थकाः ॥२९॥
अनु-पूर्वास्त एव स्युः सर्वेऽनुगमतार्थकाः ।
अटति स्यान्मृदुगतौ रिङ्गतीङ्गति च त्रयम् ॥३०॥

त्सरति **च्छ्यगमने** तथा ढोकत इत्यपि ।
लङ्घते तु **प्लुतगतौ** लङ्घत्युत्फुल्लतीति च ॥३१॥
भेदे प्लुतगतेरेव वलगति प्लवते द्वयम् ।
उड्डयते तूड्डीयते **ख-गता**वुत्पतत्यपि ॥३२॥
धावति द्रवति **क्षिप्रगमने** जवतीत्यपि ।
अटाट्यते चंक्रमीति द्वयं **भ्रमणिकाविधौ** ॥३३॥
तद्भेदे भ्रमति भ्राम्यत्यपि पर्य्यटतीति च ।
वंभ्रमीति **तदाधिक्ये** घूर्णते घूर्णते घूर्णतीति च ॥३४॥
चञ्चूर्यते जङ्घमीति पनीपद्यत इत्यपि ।
यङन्ता यङ्लुगन्ताश्च गत्यर्थाः **कुटिले गमे** ॥३५॥
बलते **परिवृत्तौ** स्याद् घोटते परिवर्त्तते ।
अग्रे पुरति, **नीचैस्तु*** फक्कत्यतति **सन्तते** ॥३६॥
कुत्सिते द्राति, **विकले** द्वयं खञ्जति खोड़ति ।
पवते वाति **वातस्य** वहति प्रवहत्य**पाम्** ॥३७॥
धोरत्युत्ताम-वाहादेर्वर्त्तसस्याटीकते क्रमे ।
उद्गच्छत्य**ुदये** षट् स्युरुज्जिहीत उदीयते ॥३८॥
उदञ्चत्युद्यत्येतावात्मने द्वावुदेति च ।
गत्यर्थाः प्राय उत्पूर्वा उदयस्याभिधायकाः ॥३९॥
उन्मीलत्युन्नमति च **मेघाद्यभ्युद्गमे** द्वयम् ।
आक्रम्यते चाक्रमते ज्योतिःकर्त्तृक उद्गमे ॥४०॥

---

* अग्रतो गमने पुरतीति, नीचैर्गतौ फक्कति, नीचैर्गतिरसद्व्यवहारः, शनैर्गमनमित्येके ।

स्त्यायतीति[1] प्रसरति **प्रसारे** विसरत्यपि ।
सञ्चारे सञ्चरत्येतत्तृतीयायुक्तमात्मने ॥४१॥

स्रंसतेऽधोगतौ भ्रश्यत्यपि भ्रंशत इत्यपि ।
पतत्यपि **द्रवादेस्तु** क्षरति च्यवते तथा ॥४२॥

स्कन्दति श्च्योतति तथा स्रवत्यपा गलत्यपि ।
रीयते स्यन्दते चात्र सरतीति क्रिया नव ॥४३॥

विलीयते द्रवति च **कठोर-क्षरणे** द्वयम् ।
अस्तंगमेऽस्तमयते निम्लोचत्यस्तमेति च ॥४४॥

अन्तर्धाने तिरोन्तर्भ्यामुभे धत्ते दधाति च ।
अपक्रामत्यपैतीति नश्यत्यपि पलायते ॥४५॥

प्रायोप-पूर्वा गत्यर्था **अपयाने** प्रकीर्त्तिताः ।

पराङ्मुखत्वे तु परावर्त्तते च पराञ्चति ॥४६॥
अतिक्रामत्युच्चरते तथातिचरतीत्यपि ।

अत्येत्युल्लङ्घयत्याद्या धातवः स्युरतिक्रमे ॥४७॥
निष्कासने निष्क्रमयत्यवकर्षति चात्र हि ।
निष्कालयति निःसारयति चेत्यादयः क्रियाः ॥४८॥

प्रवासे तु प्रवसति तथा विवसतीत्यपि ।
रणेऽभिक्रमते शत्रून् प्रत्यभ्येति मतौ गतौ ॥४९॥

अभियोगेऽभ्यवस्कन्दत्यभियुङ्क्त इति द्वयम् ।
सेनया त्वभियाने स्यादभिषेणयतीत्यदः ॥५०॥

१। स्यायतीति (ख)।

सन्निकर्षति तु प्रत्यासीदत्यासीदतीत्यपि ।
परस्मै सन्निकर्षते[1] सन्निधत्ते च **सन्निधौ** ॥५१॥
प्राप्तौ प्राप्नोति लभते विन्दतेऽनुरुणद्धि च ।
अनुरुन्धे भावयते विन्दत्यासादयत्यपि ॥५२॥
व्याप्नोति व्यश्नुते **व्याप्तौ** वेवेष्टीत्यात्मनेऽपि च ।
पर्याप्नोति तु शक्नोति क्षमते प्रभवत्यपि ॥५३॥
कल्पते पारयति च **सामर्थ्य** ऽत्र पदानि षट् ।
उद्यमे चावगुरते उद्गूरयत इत्यपि ॥५४॥
उद्यच्छति तथोद्युङ्क्ते स्युः पञ्चोद्यच्छतेऽपि च ।
वेष्टने वेष्टत इति परिक्षिपति चात्मने ॥५५॥
परिश्रयति चेति द्वे वेष्टयत्यादयोपि च ।
निरुणद्धि निगृह्णात्यात्मने च द्वौ **निरोधने** ॥५६॥
जयत्याक्रमति तथा धर्षयत्यपि धर्षति ।
विलङ्घयत्यभिभवत्यपि च न्यक्करोति च ॥५७॥
तथा विजयते चास्कन्दतीत्य**भिभवे** नव ।
विशेषयत्य**तिशये** विशिनष्टि प्रकर्षति ॥५८॥
विशेषत्यतिशेते च तथोत्कर्षयतीति च ।
उत्कृष्यते द्वयं कर्मकर्त्तर्यत्रारिच्यते ॥५९॥
विस्मापयति विस्मेरयति चित्रीयतेऽद्भु**ते** ।
धुनने कम्पयत्यत्र तथा वेपयतीति च ॥६०॥

---

१ । सन्निकृषते (ख) ।

त्रयं धुनोति धूनोति धुनातीत्यात्मनेऽपि च ।
धुवत्येवं धूनयति चलयत्यपि चाष्टकम् ॥६१॥
आन्दोलयति तद्भेदे तथा प्रेङ्खोलयत्यपि ।
दोलयत्यपि च प्रेङ्खयति हिन्दोलयत्यपि ॥६२॥
आविध्यति भ्रमयति विघूर्णयति च त्रयम् ।
विलोड़यति मथ्नाति गाहते मन्थतीत्यपि ॥
त्रासने त्रासयत्यत्र भाययत्यपि खटति ॥६३॥
प्रयोजकाद्भये भीषयते भापयते च वा ।
तथा कुहयते विस्मापयते चेति तद्भिदि ॥६४॥
कम्पे तु कम्पते त्वङ्गत्येजत्यत्र च वेपते ।
लोलतीति क्रियाः षट् स्युः परिप्लवत इत्यपि ॥६५॥
प्रस्विन्नीभवति **स्वेदे** तथा प्रस्विद्यतीति च ।
आहन्ति ताड़यति च **ताड़ने** जासयत्यपि ॥६६॥
प्रहरत्यात्मने चाथ तद्भेदे कुट्टयत्यपि ।
आस्फालयत्यर्दयति तथैवोद्घट्टयत्यपि ॥६७॥
विध्यति च्छिदयत्यत्र **वेधे** भेदयति त्रयम् ।
आहतेऽकर्मकत्वे स्यात् स्वकीयाङ्गे च कर्मणि ॥६८॥
युध्यते संप्रहरते संग्रामयत इत्यपि ।
विगृह्णाति विगृह्णीते **समरे** कलहायते ॥६९॥
निध्वानयति **शंखादेर्ध्व ननेऽत्र** धमत्यपि ।
वीणादेर्वादयत्यत्र तथा वादयतेऽपि च ॥७०॥
क्वाणयत्यत्र रणयत्यपि प्रक्वाणयत्यपि ।
क्ष्वेड़ते **सिंहवदनादे, बाहुयुद्धे** नियुध्यते ॥७१॥

पराक्रमे वीरयते पराक्रमत त्यपि ।
ऊर्जायते[१] शूरयते तथा विक्रमतेऽपि च ॥७२॥
प्रगल्भते **प्रगल्भत्वे** 'तत्र चोर्जस्वलायते'[२] ।
अरुष्करोत्यात्मनेऽपि व्रणयत्यङ्ग-**चूर्णने** ॥७३॥
गोकर्त्तृकायां हिंसायां प्रस्तुम्पति सुड़ागमात् ।
हिनस्ति संज्ञपयति सूदते हन्ति तर्दति ॥७४॥
प्रमाययत्यर्दयते निवर्हयति हिंसति ।
तृणेढ़ि घातयति च शृणात्युज्जासयत्यपि ॥७५॥
प्रतिष्किरत्यालभते कषते मारयत्यपि ।
कषत्युन्माथयत्यत्र क्षिणोतीत्यात्मनेऽपि च ॥७६॥
क्षणोति द्वे विशसति निस्तर्हयति रध्यति ।
षड्विंशतिः सूदयति **हिंसायां** हिंसयत्यपि ॥७७॥
कृणोति कृणुते पुथ्यत्यपि क्रथति तुम्पति ।
मीनात्युन्नाटयत्याद्या हिंसायां विरलोदयाः ॥७८॥
अर्दने लुम्वयत्यत्र लुम्वत्यर्दत्यपि त्रयम् ।
पीड़ने तु व्यथयति क्लिश्नाति च दुनोति च ॥७९॥
तपति ग्लापयत्यत्र बाधते पीड़यत्यपि ।
धूपायति ग्लपयति तुदति क्लेशयत्यपि ॥८०॥
दुःखाकरोत्यात्मनेऽपि तुदते खेदयत्यपि ।
दुःखयत्युत्क्लमयति स्यात् कदर्थयतीत्यपि ॥८१॥

१। ओजायते (ख)। २। तथात्र जघनायते (क)।

भनक्ति त्रोटयति च रुजत्यामर्दयत्यपि ।
भञ्जयत्यथ तद्भेदे मोटयत्यपि मोटति ॥८२॥
मर्दयत्यत्र मुटति मन्थयत्यथ[1] **पेषणे** ।
क्षुणत्ति[2] म्रदते क्षुन्ते मृद्नाति च पिनष्टि च ॥८३॥
सञ्चूर्णयत्यथ ध्वंसयति क्षपयतीत्यपि ।
नाशने नाशयति च तिस्रोऽथो**न्मूलन** क्रियाः ॥८४॥
उन्मूलयत्युत्खनति तथोज्जटयतीति च ।
उत्पाटयत्युत्खनते षड़ुद्धरति चात्मने ॥८५॥
उल्लुञ्चतीति केशादे**रुत्पाटन-विधौ** क्रिया ।
द्विधाकृतौ पाटयति फालयत्यंशुकादिनः ॥८६॥
निष्पीड़यति निश्च्योतयति निर्गतियत्यपि ।
वैरशुद्धौ प्रतिकरोत्यत्र नियातियत्यपि ॥८७॥
भङ्गे पराभवत्यत्र पराजयत इत्यपि ।
जयत्यु**त्कर्ष-संप्राप्तौ** द्वयं विजयतेऽपि च ॥८८॥

इति क्षत्रियचेष्टावर्गः

[वैश्यचेष्टा-वर्गः]

कर्षणे तु कृषत्यत्र कृषते कर्षतेऽपि च ।
रदत्येव विलिखति खनत्यपि हलत्यपि ॥१॥
वीजाकरो**त्युप्तकृष्टौ** स्याद् द्वितीयाकरोत्यपि ।
शंवाकरोति द्विगुणाकरोति **द्विःकृषौ** त्रयम् ॥२॥

१। दालयत्यथ (क)। २। क्षणोति (क)।

तृतीया-त्रिगुणाभ्याञ्च करोति **त्रिःकृषौ** मतम् ।
आख्यातानि खनत्यादीन्यहनीयानि चात्मने ॥३॥

आलोड़यति **सङ्गाहे** तथा सङ्गाहतेऽपि च ।
हलि-ग्रहे हलयति हलिरुक्तो महद्धलम् ॥४॥

वपत्युप्तौ प्रकिरति वपतेऽथ **रोपणे** ।
मूलयत्यपि संरोहयति संरोपयत्यपि ॥५॥

स्थिरतायां ध्रवत्यत्र[1] मूलति प्रतितिष्ठति ।
शोषे तु शुष्यति तथा शुण्ठत्याश्यायतेऽपि च ॥६॥
वायतीति च **सेके** तु सिञ्चत्यार्द्रीकरोति च ।
आत्मनेऽपि द्वयं वर्षत्यार्द्रयत्यपि शोकते ॥७॥
उनत्ति क्लेदयति च क्नोपयत्युक्षतीति च ।
आर्द्रीभवत्यार्द्र **भावे** क्लिद्यति स्तिम्यतीति च ॥८॥
वर्द्धते वर्द्धयत्यत्र वृंहयत्येधयत्यपि ।
सञ्चये संविभर्त्तीति सञ्चिनोत्यात्मने त्रयम् ॥९॥
तथैवोपचिनोत्यत्र संभाण्डयत इत्यपि ।
राशीकृतौ पुञ्जयति कूटयत्यत्र युग्मकम् ॥१०॥
उच्चिनोति शिलत्युञ्छे त्रयमुञ्छयतीत्यपि ।
अवहन्तीति **वैतुष्यकरणे** कण्डयत्यपि ॥११॥
फलीकरोति वितुषीकरोतीत्यात्मने द्वयम् ।
परापुनात्यात्मनेऽपि प्रस्फोटयति तत्समा ॥१२॥

१। ध्रुवत्यत्र (ख)।

मिमीते मायते **माने** तत्र मातीत्यकर्मकम् ।
तोलयत्यत्र **हेमादि-माने** तुलयतीत्यपि ॥१३॥
पणते दीव्यति तथात्मने व्यवहरत्यदः ।
व्यवहारेऽपमयते परिवर्त्तयतीत्यपि ॥१४॥
विक्रीणीते निमयतेऽवक्रीणीते च **विक्रये** ।
सत्याकरोत्यात्मनेऽपि **तुल्ये** सत्यापयत्यपि ॥१५॥
क्रीणीते विनिमयते क्रीणातीति **क्रये** तिस्रः ।
स्यान्नै**पुण्ये** निपुणति निष्णाति दक्षते चात्र ॥१६॥
अर्जनेऽर्जत्यर्जयति **गणने** गणयत्यपि ।
कलयत्यपि संख्याति **गुणने** गुणयत्यपि ॥१७॥
आहन्तीति द्वयं **प्रोञ्छे** प्रोञ्छत्युत्सारयत्यपि ।
तद्भेदे लुम्पते लुम्पत्यत्र मार्जति च त्रयम् ॥१८॥
विभागे वण्टयत्यत्र विभजत्यात्मनेऽप्यदः ।
विभाजयत्यंशयति वण्टत्यपि च पञ्चकम् ॥१९॥
तिरस्करोत्यपि दधात्यत्र व्यवदधात्यपि ।
पिदधात्यावृणोतीति संवृणोति स्तृणोति च ॥२०॥
स्तृणातीत्यात्मनेऽप्यष्टौ तथा संगोपयत्यपि ।
अपवारयति छादयति स्थगयतीत्यपि ॥२१॥
तिरयत्या**वृतौ** चाथ **निक्षेपे** निक्षिपत्यपि ।
निक्षिप्यत्यात्मनेऽपि द्वौ तथोपनिदधाति च ॥२२॥
न्यस्यति प्रतिदत्तेऽथ निष्क्रयीकुरुते तथा ।
स्यात् प्रत्युपकरोत्यत्र निर्ऋणीभवतीति च ॥२३॥

प्रत्यर्पयति तु **न्यासार्पणे** निर्यातयत्यपि ।
अपेक्षतेऽभ्यर्थयते वनुतेऽर्दति नाथति ॥२३॥
याच्ञायां भिक्षते मार्गयते याचति याचते ।
मार्गत्यन्विच्छति गवेषयत्यन्विष्यतीति च ॥२४॥
अन्वेषते मार्गयति विचिनोत्यात्मनेप्यदः ।
अन्वेषणे मृगयते मृग्यतीति नव क्रियाः ॥२५॥
दोहानुकूल्ये दुग्धे गौः, प्रस्नुते च **स्वयंस्रवे** ।
दोग्धि दुग्धे त्रयमिदं प्रपूरयति **दोहने** ॥२७॥
स्तवे तु स्तौत्यथो यौति विप्रयुङ्क्ते वियौति च ।
वियोजयति विश्लेषयति चात्र **वियोजने** ॥२८॥
वियुज्यते विघटते तथा विश्लिष्यतीति च ।
विच्छिद्यते द्वयं कर्मकर्त्तरि व्यतिरिच्यते ॥२९॥
मिश्रणे मिश्रयत्यत्र तथा संयोजयत्यपि ।
रूषयत्यत्र[1] संमेलयति छुरयतीत्यपि ॥३०॥
संयुनक्ति च सप्तात्र क्रियाः संघटयत्यपि ।
संयुज्यते तु संयौति संपृणक्त्यात्मनेऽपि च ॥३१॥
संभिद्यते कर्मकर्त्तर्यत्र संसृजतीत्यपि ।
संबध्नाति मिलत्यत्र सङ्गच्छति च **सङ्गतौ** ॥३२॥
विना कर्मात्मने* चात्र तथा सन्निपतत्यपि ।
उपसीदत्युपनमत्यत्र स्यादुपकण्ठते ॥३३॥

१। तूषयत्यत्र (क) । * सङ्गच्छते इयं वाणी ।

तद्भेदे समवैतीति सचते चासजत्यपि ।
व्यतिषज्यत इत्येतत्पदं स्यात् कर्मकर्त्तरि ॥३४॥

उत्फणत्युच्छलति च तथोद्रिच्यत इत्यपि ।
उत्सिच्यते **तथोत्सेके** द्वितयं कर्मकर्त्तरि ॥३५॥

उत्क्षेपणे तून्नयति तथोत्क्षिपति चात्मने ।
उदस्यत्युद्धरति च चत्वार्य्युत्तम्भयत्यपि ॥३६॥

आनीतावानयत्येतदाहरत्यपि चात्मने ।
संमार्जयति संमार्ष्टि तथा परिसमूहति ॥३७॥

आत्मनेऽपि च **सम्मार्जे** उपदेग्ध्युपलिम्पति ।
आत्मनेऽपि पदद्वन्द्वं गोमयत्यु**पलेपने** ॥३८॥

सन्दीपने ज्वलयति तथा सन्दीपयत्यपि ।
उद्योतयति संधुक्षयति च ज्वालयत्यपि ॥३९॥

पाके तु रन्धयत्यत्र पचतीत्यात्मनेऽप्युभे ।
अधिश्रयति च श्राति श्रपयत्यपि रध्यति ॥४०॥

रध्यते पच्यते कर्मकर्त्तृकेऽत्र च राध्यति ।
भर्जते **पाकभेदे** स्यात्त्रयं भृज्जति भृज्जते ॥४१॥

शूलाकरोत्यात्मनेऽपि **शूल-पाके** पदं मतम् ।
द्रवीकृतौ लीनयति लयति द्रावयत्यपि ॥४२॥

लालयत्यपि वा लाययति लापयतीत्यपि ।
संदधात्यात्मने चाभिषणोत्या**भिषवे** द्वयम् ॥४३॥

स्वदते रोचते[1] **रुच्यां, संस्कृतौ** संस्करोत्यदः ।
आत्मने **प्रतियत्ने** तु स्यादुपस्कुरुते द्वयम् ॥४४॥

इति वैश्यचेष्टावर्गः

[शूद्रक्रिया-वर्गः]

वयते-वयती **व्यूतौ** वूयतेऽथ विषीव्यति ।
तथा निषीव्यति **स्यूतौ** परिषीव्यति सीव्यति ॥१॥
तक्षति श्यति तक्ष्णोति कृश्यति क्रशयत्यपि ।
तक्षणे त्वक्षति तथा परिवासयतीत्यपि ॥२॥
उल्लेखे उल्लिखत्येक**मुत्कीर्णौ** तूत्किरत्यदः ।
संक्ष्णुते **तैक्ष्ण्यकरणे** क्ष्णौति चोत्तेजयत्यपि ॥३॥
निशिनोति निशीशांसत्यात्मनेऽपि पदद्वयम् ।
छेदने कृन्तति छिन्ते छिनत्ति छेदयत्यपि ॥४॥
च्छ्रति[2] वर्द्धयतीत्यत्र वृश्चतीत्यथ तद्भिदि ।
चोटयत्यत्र चुटति छुटति छोटयत्यपि ॥५॥
प्रायो लुनीते **धान्यादेश्छेदे** दाति लुनात्यपि ।
त्रुटति त्रुट्यति **च्छेदे** छिद्यते कर्मकर्त्तृके ॥६॥
भिन्ते विदारयति च भिनत्ति च **विदारणे** ।
आखण्डयत्यपि स्फोटयति भेदयति द्यति ॥७॥

१। रुच्यते (क)। २। द्यति (ख)।

परीक्षते निकषते **शुद्धतादि-विनिर्णये** ।
प्लोषति प्लुष्यति दहत्योषति ज्वलयत्यपि ॥८॥
मुष्णाति चोरयत्यत्र लुण्ठयत्यपि **मोषणे** ।
आत्मने चापहरति ग्लोचत्यत्र च लुण्ठति ॥९॥
उल्लण्ठत्याच्छिनत्तीति द्वयमेतद्बलात्कृतौ ।
प्रसहत्यात्मनेऽप्यत्र हठतीति **बलात्कृतौ** ॥१०॥
निष्कुष्णाति तु **निष्कर्षे** तथा निष्कर्षतीत्यपि ।
स्यान्निष्कुलाकरोत्येतदात्मनेऽत्र तु **सव्यथे** ॥११॥
द्वे निष्पत्रा-सपत्राभ्यां करोति कुरुते पदे ।
लक्षयत्यङ्कयत्यत्र लाञ्छतीति च **लक्षणे** ॥१२॥
सन्दानयति बध्नाति तथा संद्यति कीलति ।
नह्यतीत्यात्मने त्रीणि संयच्छति सिनोति च ॥१३॥
पाशयत्यपि **बन्धे**ऽथ विपाशयति **मोचने** ।
विमोचयत्यथ **स्तम्भे** स्तम्भते स्कम्भते तथा ॥१४॥
अथ **स्तब्धीकृतौ** स्तम्भयति विष्कम्भयतीत्यपि ॥
प्रतिबध्नाति च तथा **विघ्ने** प्रत्यर्थयत्यदः ॥१५॥
तथा विहन्त्यन्तरेति प्रत्यूहत्यात्मनेऽपि च ।
विघ्नयत्यन्तरयति प्रत्यवैति तु दुष्यति ॥१६॥
दुष्करोत्यघयत्यत्र **दुष्कृते** पङ्कयत्यपि ।
सन्ततौ सन्तनोतीति तथा सन्तनुतेऽपि च ।
अत्र सत्रायते सन्तानयतीति चतुष्टयम् ॥१७॥

इति शब्दक्रियावर्गः

इति प्रयुक्ताख्यात-मञ्जर्यां द्वितीयः काण्डः ॥

तृतीयः काण्डः

प्रकीर्णक-सनाद्यन्त-नानार्थाख्यास्तृतीयके ।
अकर्मकाश्च काण्डऽस्मिन् वर्गाश्चत्वार ईरिताः ॥१॥

[प्रकीर्णवर्गः]

यानि पूर्वमसंगत्या नैवाख्यात-पदानि ह ।
आख्यातानि प्रचक्ष्यन्ते तानि वर्गेऽत्र कानिचित् ॥२॥

प्रभाति व्युच्छति **व्युष्टे** प्रत्यूषति विभाति च ।
अवदायति **शुक्लत्वे** श्वेतते च क्रियायुगम् ॥३॥

रज्यति त्रीणि रजति लोहितायति चात्मने ।
शोणतीति च **रक्तत्वे**[1], **हरित्त्वे** हरितायति ॥४॥

नीलायते[2] 'नीलति च तथा' श्यामायते पदम् ।
वृष्टिरोधेऽवगृह्णाति तथावस्कन्दति द्वयम् ॥५॥

सूर्य्यन्दु-ग्रहणे तूपप्लवते चोपरज्यति ।
उत्कोचयति **तूत्कोचे** दरिद्राति तु **दुर्गतौ** ॥६॥

व्यभिचारे व्यभिचरत्यन्यथाभवतीत्यपि ।
दूरीकृतौ दवयति विप्रकर्षयतीत्यपि ॥७॥

द्राघयत्यायमयति स्या**द्दीर्घीकरणे** द्वयम् ।
उद्भासे तूद्वसत्यत्र तथोच्छन्नीभवत्यपि ॥८॥

१। रक्तम्नि (ख) ; २। च नीलाति तथा (ख) ।

उत्सीदत्युज्जटति च **शेषे** तु परिशिष्यते ।
अत्रावशिष्यत इति द्वितयं कर्मकर्त्तरि ॥९॥
संघाते पिण्डयत्यत्र स्त्यायत्यपि समूहति ।
कण्डूयति तु **कण्डूतौ**, **घृष्टौ** कषति घर्षति ।
उपसंहरतीति स्यात्तथा निगमयत्यपि ॥१०॥

इति प्रकीर्ण-वर्गः

[सनादिवर्गः]

धातोस्तुमर्थादिच्छायां सनि रूपं वुभूषति ।
ईचिक्षिषत* इत्यादि पूर्ववच्चात्मनेपदम् ॥१॥
नाम्नोमान्ताव्ययान्यस्मात् यिनि-काम्ये च कर्मणः ।
आत्मनस्तु तदिच्छायामर्थे स्यातामुभे क्रिये ॥२॥
पुत्रकाम्यति पुत्रीयतृक्काम्यतृच्यतीति दिक् ।
एवं कर्मण आचार आधार उपमार्थकात् ॥३॥
यथा पुत्त्रीयति च्छात्रं मञ्चे सौधीयतीति दिक् ।
उपमानात्तथा कर्त्तुराचारार्थे क्रियाद्वयम् ॥४॥
आयौलोपेऽस्य च यथा गर्द्धभोऽश्वायतेऽश्वति ।
स ओजोऽप्सरसोर्नित्यं पय-आदेश्च वा स लुक् ॥५॥
कन्याप्सरायते चौजायतेऽहिः कं पयायते ।
पयस्यते तथान्यस्मात् स-लोपो† वा दिगूह्यताम् ॥६॥

---

* ईक्षितुमिच्छति । † सरायते सरस्यते परिखा ।

भृशादेश्च भवत्यर्थेऽत्यर्थे रूपं भृशायते ।
सुमनायत इत्यन्यदूह्यं व्यञ्जन-लोपतः ॥७॥
सुमना उन्मना ओजश्चपलः पण्डितः शुचिः ।
मन्द-भद्रोत्सुका नील-शीघ्राद्याश्च भृशादयः ॥८॥
तत्रैव लोहितादेः स्याद्विकल्पेनात्मनेपदम् ।
लोहितायति पूर्वा दिक् सूर्योऽयं लोहितायते ॥९॥
लोहितः श्याम-जिह्मौ च गर्वो दुःखं सुखं कृपा ।
मूर्छा निद्रा च करुणा हर्षाद्या लोहितादयः ॥१०॥
पापार्थ-क्रमणे कष्टादिभ्यः कष्टायते-मुखाः ।
वाष्पोष्म-फेन-धूमात्तूद्वान्तौ वाष्पायते-मुखाः ॥११॥
सुखादेरनुभूत्यर्थे शब्दा दुःखायते-मुखाः ।
सुख-दुःखास्र-कृपण-करुणालीक-कृच्छ्रवत् ॥१२॥
प्रतिपाद्यञ्च विद्वद्भिः सुखादिकमुदीरितम् ।
शब्दादिभ्यः कृतौ शब्दायते-वैरायते-मुखाः ॥१३॥
शब्दो वैरञ्च कलह-मेघ-वेगाभ्र-दुर्दिनम् ।
शीका-सुदिन-नीहारादयः शब्दादयः स्मृताः ॥१४॥
कण्ड्वादेस्तत्र कण्डूयत्यात्मनेऽपि हृणीयते ।
असूयतीत्यादिकञ्च पूर्वं किञ्चित् प्रदर्शितम् ॥१५॥
व्यञ्जनादेर्भृशे पोनःपुन्ये चैकस्वरात् क्रियाः ।
वोभूयते-मुखा धातोर्न गृणातेः शुभे रुचेः ॥१६॥
बहुलं लुकि तत्रापि वोभवीत्यादिका मताः ।
गत्यर्थेभ्यश्च कौटिल्ये लपादेर्भाव-गर्हणे ॥१७॥

तेन जङ्घम्यते लोलुप्यत इत्यादिकं भवेत् ।
प्रयोजकस्य व्यापारे धातोरिणि कृते सति ॥१८॥
भावयत्यादि तत्रीह्यमिनन्ताच्चात्मनेपदम् ।
तत्करोति तदाचष्ट इत्यर्थे इनि लिङ्गतः ॥१९॥
वटुं मुण्डयति क्षेमयतीत्याद्याः क्रिया मताः ।
सत्यवेदार्थतस्तत्राप् स्यात् सत्यापयतीति दिक् ॥२०॥
अन्यतोपि व्रत-श्लोक-वीणा-सेनादिना मतः ।
भवन्ति तत्तदर्थेषु व्रतयत्यादयः क्रियाः ॥२१॥

इति सनादि-वर्गः

[नानार्थवर्गः]

अथोच्यन्तेऽत्र नानार्थाः सत्तायां **भवति**-क्रिया ।
आप्तौ जन्मनि च क्वापि प्राकट्ये ऽप्युद्भवत्यसौ ॥१॥
साहित्ये सम्भवे च स्यात् क्रिया **सम्भवतीत्य**सौ ।
आद्योपलम्भे सामर्थ्ये **प्रभवत्यथ** वैभवे ॥२॥
व्याप्तौ च स्याद् **विभवति** मानसे च * जपत्यदः ।
याच्ञोपतापैश्वर्येषु **नाथत्या**शिषि **नाथते** ॥३॥
स्तवेऽभिवादने चापि **वन्दते**, ह्लादते पुनः ।
ह्लादे शैत्ये च, संक्लेश-हिंसयोः **क्लुन्थती**त्यदः ॥४॥
याच्ञा-हिंसा-गतिष्व**र्दत्य**थ, **क्रन्दति** रोदने ।
आह्वाने, **लङ्घते** तु स्यादुपवासे गतावपि ॥५॥

---

* च-कारात्लघूच्चारणे ।

कम्पने **खञ्जति** गतौ याच्ञागत्योस्तथाञ्चते ।
तयोश्च* पूजने **चाञ्चत्यथ** मोहे समुच्छ्राये ॥६॥

मूर्च्छतीत्यथ कोटिल्ये स्वल्पीभावे च **कुञ्चति** ।
शब्दे **गर्जति** नादे च **हिण्डते**ऽनादरे गतौ ॥७॥

कटत्यावृति-गत्योः स्याच्छटती**त्य**वसादने † ।
तथा विसरणे, दान-दययोर्द**यते**-पदम् ॥८॥

परिप्लवत इत्येतच्चापले लाघवेऽपि च ।
पूयते स्यादविशरणे दुर्गन्धे, **क्रूयते** त्विह ‡ ॥९॥
उन्दे च, स्फीततायान्तु पालनेऽपि च **तायते** ।
क्रम्यते क्रमते स्यातां तायनोत्साह-वृत्तिषु ॥१०॥
गतौ जग्धौ च **चरति**, निष्पत्तौ तु **फलत्य**दः ।
तथा विशरणे चाथ **कलते** शब्द-संख्ययोः ॥११॥
जयत्यरि-पराभूतौ स्यादुत्कर्षे त्वकर्मकः ।
अवत्यष्टादशार्थे च प्रायः प्रीणन-रक्षयोः ॥१२॥
स्यान्मौण्ड्रेज्योपनयन-व्रतादेशेषु **दीक्षते** ।
सन्दीपने जीवने च **धुक्षते, शिक्षते** पुनः ॥१३॥
ज्ञीप्सा-विद्याग्रहणयोर्दीप्तौ स्वादे च **रोचते** ।
काशते कफजे शब्दे दीप्तौ चायं प्रयोगतः ॥१४॥
गतौ कम्पे च **चलति** हर्षे तु **मदयत्य**दः ।
ग्लपने चाथ फुत्कारे **क्रोशत्या**ह्वान-रोदने ॥१५॥

---

* याच्ञागत्योः । † शटति दरिद्रः, शटति दधि । ‡ दुर्गन्धे ।

शिक्षणे क्षपणे चापि क्रिया **विनयती**त्यसौ ।
अवसादे विशरणे **सीदती**त्यथ **धावति** ॥१६॥
गति-शुद्धयो-**मेधती**ति मेधा-हिंसन-सङ्गमे ।
मिथ्याज्ञाने घूर्णने च **भ्रमति भ्रम्यती**त्युभे ॥१७॥
ह्वयते स्पर्धने हूतौ **चायती**क्षण-पूजयोः ।
वहति प्रापण-स्यन्द-धृतिष्वथ **धमत्यदः** ॥१८॥
निःस्वनानल-फुत्कृत्योर्**वपत्यु**प्तौ च मुण्डने ।
प्लवे **तरत्यु**त्तरणे **नक्षती**ति गतौ स्रवे ॥१९॥
गतौ **स्कन्दति** शोषे च स्यन्दे चाथ मरुद्गतौ ।
पावित्र्ये **पवते** हिंसा-घर्षयोस्तु **कषत्यदः** ॥२०॥

इति भूवादिः

पीड़नेऽप्यु**पहन्त्ये**तदशुचीकरणेऽपि च ।
मिश्रणेऽमिश्रणे **यौति, सौति** तु प्रसवैश्ययोः ॥१॥
ज्ञान-विश्वासयोः **प्रत्येत्यध्येत्य**धिगमे स्मृतौ ।
पिपर्त्ति पूरणे त्राणे, **विभर्त्ति** भृति-पोषयोः ॥२॥
दधाति* चाथ विश्वास-स्पृहयोः **श्रद्दधात्य**दः ।
संङ्कल्पे वञ्चने च स्याद**भिसन्धत्ते** इत्यदः ॥३॥
अनुसन्धत्ते इत्येतद् विचार-प्रत्यभिज्ञयोः ॥४॥

इत्यदादिः

विजिगीषा-द्युति-क्रीड़ा-गति-स्तुतिषु **दीव्यति** ।
संराद्धि-हिंसयो**रध्यत्य**ङ्गीकारे तु संविदि ॥१॥

---

* भृति-पोषयोः ।

प्रतिपद्यत इत्येतद्दर्पे हर्षे च **माद्यति** ।
क्षीवत्वे चाथ हर्षे च गर्वितत्वे च **हृष्यति** ॥२॥

इति दिवादिः

जुषते सेवन-प्रीत्योर्**मुटत्या**क्षेप-मर्दयोः ।
घुरत्यार्त्तौ च भीमे च शब्देऽपि गति-वासयोः ॥१॥
क्षियतीति क्षुरत्येतत् पदं छेदे च खण्डने ।
प्रेषणे सृष्टिभेदे च त्यागे **विसृजती**त्यदः ॥२॥
हृष्ट-भक्षार्थ-नीड़ाथ विहङ्गम-चतुष्पदाम् ।
आलेखनेऽ**पस्किरत** आत्मनेपद-सुड्विधौ ॥३॥

इति तुदादिः

पीड़ने मन्थने चात्र सन्धानेऽ**भिषुणोत्य**दः ।
गति-वृद्धयोर्**हिनोती**ति **कृणोति** कृति-हिंसयोः ॥१॥

इति स्वादि-गणः

उर्य्युर्यु ररीभ्यश्च **करोति कुरुते** पदे ।
विस्ताराङ्गीकरणयोर्विक्रियायान्त्वकर्मकम् ॥
पदं **विकुरुते** शब्द-कर्मकार्थे च सम्मतम् ॥१॥

इति तनादि-गणः

अनक्ति म्रक्षणे व्यक्तौ, **विनक्ति** चलने भये ।
सुरते चोपभोगे च **सं भुङ्क्ते** इति कीर्त्तितम् ॥१॥

इति रुधादि-गणः

श्रीणाति मिश्रणे पाके, **पृणाति** त्राण-पूरणे ।
गृह्णात्यैतदुपादाने ज्ञाने **गृह्णीत** इत्यपि ॥१॥
अवष्टभ्नाति तु प्रोक्तमन्तिकालम्बनार्थयोः ॥२॥

इति क्रयादि-गणः

लक्षयत्यङ्कने दृष्टौ गत्यां **वाजयती**त्यदः ।
शर-संस्करणे चाथ मारण-ज्ञापनादिषु * ॥१॥
ज्ञपयत्यथ भूषायां प्रमोदे **मण्डयत्यथ** ।
छेदने पूरणे चापि पदं **वर्द्धयती**त्यदः ॥२॥
भेदे निमन्त्रणाहूत्योरा**मन्त्रयत** इत्यदः ।
निर्यातयति वैरस्य शुद्धौ न्यासार्पणे तथा ॥३॥
वर्णक्रिया-गुणोक्त्योस्तु **वर्णयत्यत्र** जीवने ।
बले **चोर्जयत्यूर्जयते** ह्रीरुषोस्तु **हृणीयते** ॥४॥
ऋतीयते घृणायाञ्च पूजा-वृद्ध्योर्म**हीयते** ।
भोजने तन्निवृत्तौ च पदं **व्रतयती**त्यदः ॥५॥
वल्गूयति तु माधुर्ये पूजने च प्रकीर्त्तितम् ॥६॥

इति चुरादि-गणः

इत्यनेकाथ-वर्गः

---

* मारण-तोषण-निशानेषु ।

अकर्मक-धातवः

सकर्मकोऽप्यकर्मा स्याद् विवक्षा चेन्न कर्मणः ।
क्वाप्यकर्मापि कर्माढ्यो भावनायां भवेदिह ॥१॥
अतः स्यान्नाति-नैयत्यमकर्मक-सकर्मणोः ।
धातवोऽथापि लिख्यन्ते प्रायो ये स्युरकर्मकाः ॥२॥
सत्तायामुदये स्नेहे मोह-स्नान-विशुद्धिषु ।
शयनासन-लज्जासु जीवने मरणे क्रूधि ॥३॥
त्वरायां क्रीड़ने नृत्ये रोदन-स्थिति-दीप्तिषु ।
भये स्यन्दे च सन्देहे शोष-स्पर्द्धा-क्षयेष्वपि ॥४॥
मदोद्वेग-प्रकम्पेषु व्यथा-जागर-वृद्धिषु ।
जरायां स्वदनो[1]त्पत्त्योर्मूत्रणे हृदने तथा ॥५॥
विकाशे मीलने ह्रासे नाश-स्फुर्त्ति-समृद्धिषु ।
तोषे दोषे विरागे च विषादोन्माद-सिद्धिषु ॥६॥
[2] प्रभातैश्वर्य्य-दम्भेषु शुक्लिमादि-गुणेषु च [3] ।
ध्वनौ क्लैव्ये दरिद्रत्वे ग्लानि-गर्व-श्रमेष्वपि ॥७॥
क्षोभादिषु तथार्थेषु धातवः स्युरकर्मकाः ।
आयन्ता लोहिताद्याश्च [4] तथा ये नामधातवः ॥८॥

---

१ । स्वदते मोदकः । २ । प्रभाति रजनी । ३ । श्वेतते प्रासादः ; नीलति नभः । ४ । कृष्णायते गोपी, लोहितायते प्राची ।

आत्मनस्तत्तदिच्छायां भवेयुस्तेऽप्यकर्मकाः ।
अर्थैक्येऽप्यर्थभेदेऽपि स्वयमेव द्विधा स्थितिः [१] ॥९॥
एकः कश्चिद् भवेद्धातुरुपसर्ग-वशात्तथा ।
यथा [२] कुम्भात् क्षरत्यम्भो, मदं क्षरति कुञ्जरः ॥१०॥
[३] जयतीश्वर उत्कर्षे जयत्यभिभवे रिपुम् ।
[४] निखिलं वेत्ति गोविन्दः संवित्ते माधवः स्वयम् ॥११॥
वृन्दावने वसत्यस्मिन् हरिरावसति व्रजम् ।

तथाहि—

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते ।
तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ॥१२॥
दुहाद्या नी-वहाद्याश्च धातवो ये द्वि-कर्मकाः ।
ते विस्तर-भयादत्र ग्रन्थे विलिखिता न हि ॥१३॥
अत्रात्मनेपदादेस्तु प्रक्रिया न हि कीर्त्तिता ।
ततस्ततो व्याकरणाद्विज्ञेया सा विचक्षणैः ॥१४॥
मुदा यथार्थ-नाम्नीयं कविसारङ्ग-रङ्गदा ।
सेव्यतां कोविद-गणैः **प्रयुक्ताख्यातमञ्जरी** ॥१५॥

इति प्रयुक्ताख्यानमञ्जर्यां तृतीयः काण्डः

प्रयुक्तख्यातमञ्जरी समाप्ता *

---

१ । अकर्मकता सकर्मकता च । २ । अर्थैक्ये उदाहरति । ३ । अर्थभेदे । ४ । उपसर्गवशादकर्मकत्वं सकर्मकस्य ।

---

* पुस्तिकान्ते चैतद् दृश्यते—संवत १८९३ पौषकृष्णा ९ रवे हस्ताक्षर-विहारीलाल मिश्रके । त्रिनवाष्टैकमब्दञ्च नवमी-पौषकृष्णयो विहारीलाल-लिपिः कृत्वा इयं ग्रन्थ समाप्यतः ।